| | |
|---|---|
| Kokilā Mahātmya | Title |
| | Author |
| | Editor |
| | Year, Vols. |
| | Publisher |
| 201 | Remarks |

201

अथकोकिलामहालप्रारंभः

को॰ मा॰ विश्वेदेवास्तथा साध्या वसवो ऽष्टौ तथाश्विनौ॥ धन्वंतरिस्तथा ब्रह्मा
१ विष्णुर्वैकुंठनायकः॥ ११॥ वसिष्ठो वामदेवश्च जमदग्निस्तथांगिराः॥
पराशरोथ मांडव्यो मार्कंडेयोथ गौतमः॥ १२॥ अत्रिर्भृगुस्तथा
गार्ग्यो विश्वामित्रो महातपाः॥ नारदः कश्यपश्चैव मुनिर्वैभांडक
स्तथा॥ १३॥ किंनरश्च तथा यक्षा गंधर्वाप्सरसां गणाः॥ प्रमथाश्च पि
श्च शाचा वैताला भूतनायकाः॥ १४॥ भक्तिप्रवणचित्तास्ते सर्वेपि
मुनिसत्तमाः॥ नमश्चक्रुर्महादेवं चंद्रार्धकृतशेखरं॥ १५॥
तुष्टुवुश्च तमीशानं जगत्संहारकारकं॥ भस्मोद्धूलितसर्वांगिरत्न
पन्नभूषणभूषितं॥ १६॥ तेषां स्तुतिध्वनिं श्रुत्वा देवदेवः पिनाक
धृक्॥ समाधिमीलितं नेत्रद्वयमीषद्विकाशयच॥ १७॥ सर्वांस्ति
मागतान् देवानृषीन्पितृगणांस्तथा॥ विलोकयामास तदा गंधर्वा
णां -- स्तथा॥ १८॥ ततस्तानानयामास यथोचितमनंगधृक्॥ त- १
तस्ते सत्कृतास्तेन देवदेवेन निर्जराः॥ १९॥ नद्यूर्ध्वसूचनं प्राप्य नि
षेदुः सर्वतः शिवं॥ ब्रह्माविष्णू उभयतो निषेदतुरुमापतेः॥ २०॥
अथ तेषूपविष्टेषु सुरेषु द्विजेषु च॥ भगवानाह सर्वांस्तान् स्मय
मानोभिभाष्य च॥ २१॥ हे ब्रह्मन् माधवानंत यूयं सर्वे समागताः॥
मां द्रष्टुं तन्ममात्यर्थं प्रीतिदं समभून्महत्॥ २२॥ यूयं सर्वेपि म
च्चित्ता मन्निष्ठा मत्परायणाः॥ अतो मद्दर्शनं वेद्य जानं संसारतार
कं॥ २३॥ अभक्तानां हि दुर्दर्शो भवेदं सर्वदा त्वहं॥ सर्वात्मा सर्वसा
क्षी च सुहृत्सर्वात्मिनामपि॥ २४॥ आकाशवत्सर्वगतो निर्लेपो निर्गु
णोमलः॥ विद्वद्भिः प्राप्यतेत्रैव देहे सर्वनिषेधनात्॥ २५॥ अभक्ता
मां न पश्यंति देहेहं ममताकुलाः॥ कुटुंबासक्तमनसो रागद्वेषसमा
कुलाः॥ २६॥ तस्माद्भवंतो मद्भक्ता मां प्रासामत्प्रसादतः॥ अतो मन्माहि
मानं वः प्रकाशयितुमुत्सहे॥ २७॥ मदैश्वर्यं समालोक्य न पुनः शोकम
र्हति॥ निर्गुणो निष्कलो नित्यो नामजातिविवर्जितः॥ २८॥ तथाप्यहं
भक्तकृते नामजातिक्रिया दधत्॥ तांडवेन मदैश्वर्यं भक्तेभ्यो दर्श-

को. मा.
2

याम्यहं ॥ २९ ॥ तद्द्रष्टुमिच्छा भवतां यदि स्यात्ताण्डवं देवगुणा मुनीशाः
साहित्यमत्र प्रथितं भवेद्यत्तत्सर्वमेव प्रविदध्व मत्या । ३० ॥ इतिश्री ब्र-
ह्मांडपुराणे उपासनाकल्पे कोकिलामाहात्म्ये प्रथमोऽध्यायः ॥ १ ॥ ऋषय
ऊचुः ॥ कथं कृतं तांडवं — श्वरेण सुमहात्मना ॥ के वा देवास्तांडवस्य किं सहाय्यं
प्रचक्रिरे ॥ १ ॥ सूत उवाच ॥ आज्ञप्तास्तेन ततो देवाः शंकरेण समुत्सुकाः
सहाय्यं कल्पयांचक्रुस्तांडवस्य पृथक्पृथक् ॥ २ ॥ ब्रह्मा चतुर्मुखो
जातो मृदंगस्य हि वादकः ॥ विष्णुर्वीणां दधारास्य पृष्ठतो हर्षसंयुतः ॥ ३
इंद्रस्तालं दधाराथ सोमो ढक्कां तथाहरत् ॥ डमरुं वादयामास यमो वै
कर्तनिस्तदा । ४ ॥ डिंडिमं वादयामास कुबेरः प्रीतमानसः ॥ झर्झरिश्च
तथा तत्र वादितो मातरिश्वना । ५ ॥ मर्दलश्च तथाश्विभ्यां मुरजो नं
दिना तथा ॥ पणवं वादयामास वन्हिर्देवस्य शूलिनः ॥ ६ ॥ तथैत-
रे रुद्रगणा मरुतश्च महर्षयः ॥ पिशाचाश्चैव सर्वेपि सहाय्यं च-
क्रिरे तदा ॥ ७ ॥ एवं संमानितः सर्वैरमरेशैस्तथर्षिभिः ॥ अर्धना-

२

रीश्वरः सोयत्तांडवायोपचक्रमे ॥ ८ ॥ तदा प्रदोषवेलायामारब्धं
तांडवं हि तत् ॥ अभक्तानामदृश्यं तत् भक्तदृश्यं महर्षयः ॥ ९ ॥ शंक
रां भगवांस्तत्र देवानाह प्रहस्य च ॥ देवाः सर्वे भवंतोत्र सावधाना भवंतु
हि ॥ १० ॥ अतालमस्वरं गीतमश्लाघ्यं परिचक्षते । नतत्श्राव्यं हि च
सुरैरिति मे निश्चिता मतिः ॥ ११ ॥ एवमुक्तास्तु ते सर्वे तथेति परमात्मना
॥ स्वंस्वं वाद्यं सावधाना वादयामासुरुत्सुकाः ॥ १२ ॥ तदा सोथ महादेवो
नारदस्य करं स्वयं । धृत्वा नाट्यं समारेभे जटामंडलमंडितः ॥ १३ ॥
चरणाघाततः पृथ्वी चकंपे पर्वतैः सह ॥ आकाशं च महैः सार्धं भुजाघा
तेन कंपितं ॥ १४ ॥ स्वर्गलोको जटाघातादस्वास्थ्यमुपजग्मिवान् ॥
सर्वे देवाश्च मुनयो नात्मानं च परं विदुः ॥ १५ ॥ नारदस्य करं धृत्वा भग-
वांस्त्र्यंबकस्तदा ॥ नृत्यतीत्येव ते पश्यन्तु तस्य गतिः सुराः ॥ १६ ॥ ता
लं वाद्यं च ते सर्वे नो विदन्हर्षसंयुताः ॥ मुहूर्तमभवत्सर्वमानंदमयमेव
तत् ॥ १७ ॥ ततो विहस्य भगवान्देवादीन्विवादिनं ॥ देवाः किं भ्रांतचि

 तास्यनाट्य दर्शनमात्रतः ॥१८॥ कोवारागश्च करूताल कस्वरोमूर्छना
 चका॥ विचारयंतुवैसर्वेलक्षणंसंमतांहियत् ॥१९॥ सुतउवाच ॥ एवमु
क्तास्तुतेसर्वेस्त्वस्यचिताःसुरेश्वराः॥ब्रह्मादयःप्रणम्याथ विज्ञप्तिंचाक्रिरे
तदा ॥२०॥ देवाऊचुः॥ देवापारंतवैश्वर्यंवयंज्ञातुंनशक्नुमः॥नाट्यद्रष्टुं
नशक्तायेकथंरागादिवैविदुः॥२१॥ पश्येमान्गायकान्देवगंधर्वादीन्विमो
हितान्॥येनित्यंदेवसत्रेषुगायंतिसुमनोहरं॥२२॥त्वमेवसर्वंजानासि
महिमानंजगत्पते॥ त्वमाययानचान्योस्तिज्ञातुंशक्तःपुमानिह॥२३॥
इतिदेववचश्श्रुत्वाभगवान्नीललोहितः॥जगादसर्वान्प्रहसन्भक्तःप्र
वणचेतसः॥२४॥ शिवउवाच॥ यदानंदमयंदेवाममरूपंसनातनं॥त-
दिदंदर्शितंभक्त्यायुष्माकंनात्रसंशयः॥२५॥ येमद्भक्ताःसदाचारा
जितचित्ताश्चसाधवाः॥तएवैतत्प्रपश्यंतिनतुयेनास्तिकाःशठाः॥२६
अहंसर्वस्यजगतःकर्ताहर्ताचपालकः॥साक्षीचेतयता~~मक्षि~~शश्व 
न्निर्गुणोपिगुणैर्वृतः॥२७॥ क्रीडेसर्वहितार्थंवैस्मशानेस्वगणैर्वृतः॥

तुष्टीकुर्वनिकाभोगान् आत्मारामोपिलीलया॥ २८॥ वरंवृणुध्वंवर-
दान्मत्तोयमभिकांक्षथ॥ दास्ये~~स्व~~सर्वमिथिप्रीतेदुरापंकिंभवेन्नृणां॥२९
॥सूतउवाच ॥एवमुक्तास्तुतेसर्वेशंकरेणसुरेश्वराः॥नारदंप्रार्थयामासु
र्विराणांयाचनेतदा॥३०॥देवाऊचुः॥ देवर्षेकिंचायाचिष्मेयदस्माकंहीतं
भवेत्॥ पृच्छस्वत्वंहिदेवस्यप्रियोभक्तःसुहृत्सखा ॥३१॥ इतिस्मसर्वैः
सतुनोदितोमुनिर्देवैस्तदातंभगवंतमीशं॥ नमश्चकारामरकार्यसिध
येपपृच्छचेदंमुनिसत्तमोहि॥३२॥ इतिश्रीब्रह्मांडपुराणेकोकिलामा-
हात्म्येद्वितीयोध्यायः॥२॥ ॥ऋषयऊचुः॥ किंपृष्टंनारदेनाथसूतनोव
दसुव्रत॥भगवानब्रवीत्किंवातदाभक्तपरायणः॥१॥सूतउवाच॥
देवर्षिःपरिपपृच्छभगवंतंसनातनं॥उमाविलसितार्धांगंपिनाकिन
मघापहं॥२॥नारदउवाच॥देवकेनविधानेनभक्तैस्त्वंप्राप्यसेवद॥अ
भक्तैश्चकथंनोवाविस्मयोयेमहान्प्रभो॥३॥ प्रियाप्रियादिवैषम्यंजीवे
षुपरिदृश्यते॥सर्वात्मनित्वयिकथंभक्तत्वकल्पना॥४॥तवापियदि-

कोकि० वैषम्यंजीववत्स्यान्महेश्वर ।। उपास्यत्वंकथंतेस्याज्जीवेसेवकताकथं ।। म०
४ ।।५।। ईश्वरउवाच ।। ब्रह्मान्समोहंसर्वत्रांतिष्ठाम्यात्माहिदेहिनां ।। नवैष-
म्यंमुमैमुनेप्रियाभक्तास्तथापिमे ।।६।। कल्पद्रुमोयथायेनभावेनपरि
सेवितः ।। तथैवफलतेतस्यवैषम्यरहितोपिहि ।।७।। तथाहंयेनभावे
नस्नेहात्कामाद्भयेनवा ।। आराधितस्तथातस्यफलदातानसंशयः
।।८।। एवंज्ञात्वामुनेपूर्वंबहुभिःपर्युपासितः ।। भक्त्यातेषांमहाभाग
स्वात्मानमपिदत्तवान् ।। ९ ।। अनादृतस्तथायैस्तुतेषांनाशकरोम्य-
हं ।। यथादक्षविनाशायपुराभूवंमहामुने ।।१०।। नारदउवाच ।। को-
सौदक्षःकथंचास्यविनाशमकरोद्भवान ।। तत्सर्वंविस्तरेणमेशुश्रु-
षंतिमुनीश्वराः ।।११।। ईश्वरउवाच ।। नारदाकर्णयैनांत्वंकथांपापप्रणा
शिनीं ।। पार्वतीकोकिलायत्रजाताप्राणप्रियाममा ।।१२।। मनोस्वायं
भुवस्यासन्वंशेपूर्वंप्रचेतसः ।। दशतुल्यव्रताःसर्वेसुताःप्राचीनबर्हिषः ४
।।१३।। सत्यशीलाःसनामानस्तेषांपत्नीमारिषाभवत् ।। तस्यांते-

भ्योभवत्पुत्रोदक्षःप्राचेतसःकिल ।।१४।। तेनतस्मैचनिजंराज्यंदत्वा
पुःपरमंपदं ।। ततोदक्षोकरोद्राज्यंधर्मेणमुनिसत्तम ।।१५।। तस्यराज्ञः
स्वधर्मेणनिजंराज्यंप्रशासतः ।। पुत्रोनाभूत्तदातस्यतद्राज्यंनाकरोद्रु-
तिं ।।१६।। पुत्रार्थंबहून्यज्ञानकरोद्राजसत्तमः ।। तेसर्वेविफलाजाता
निर्दैवस्ययथाक्रियाः ।।१७।। अथचिंतयमानस्यतस्यराज्ञोगृहेमुनिः ।।
आजगामांगिरानाममहात्मामोक्षपरायणः ।।१८।। तंपूजयित्वाविधिव
न्महाराजःप्रसन्नधीः ।। दक्षःप्रोवाचतंब्रह्मन्प्रजामेस्यात्कथंवद ।।१९
अपुत्रस्यहिलोकोयंपुरापिनभवेदिति ।। श्रुतिर्वदतितद्ब्रूहिपुत्रस्यान्मे
कथंमुने ।।२०।। इतिपृष्टःसराज्ञाथदक्षेणमुनिसत्तमः ।। चरुंकृत्वाजुहा
वास्यसंतत्यर्थंतपोधनः ।।२१।। वरुणप्रीतयेतेनहुत्वाशेषंचरोरथ ।। द
त्तंदक्षायचोक्तंहिभार्यायैत्वंसमर्पय ।।२२।। शतंकन्याभविष्यंतिभार्या
यास्तवसुव्रत ।। इत्युक्त्वाथागमत्स्वर्गमंगिरामुनिसत्तमः ।।२३ गते
मुनौततस्तस्यभार्याश्रीरितिविश्रुता ।। चरुशेषप्राशनाधिकन्याश
समवायसा ।।२४।। अथराजास्वकन्यानांसंस्कारान्विदधेखिलान् ।।

 स्वगृह्योक्तविधानेनविवाहमकरोत्तदा ॥ २५॥ विवाहितास्तदाजग्मु
 र्भर्तृगृहंप्रति ॥ शून्यंगृहंपुनर्जातंदुःखशोकपदंमुने ॥ २६॥ पुनःशोका
तुरस्याथराज्ञोदक्षस्यधीमतः॥ आजगामगृहंश्रीमत्कपिलोमुनिसत्त
मः॥ २७॥ राज्ञासंमानितःसोथनिषसादासनेशुभे ॥ राज्ञोमुखंसमालो
क्यपपृच्छमुनिसत्तमः॥ २८॥ कपिलउवाच॥ राजन्तवमुखंम्लानंकस्मा
न्मेवदसुव्रत ॥ धमार्थकामास्तेसर्वेसम्यक्संतिनवावद॥ २९॥ इतिपृ
ष्टःसमुनिनाकपिलेनमहात्मना॥ दक्षःप्रोवाचतंविप्रमात्मानंगर्ह
यन्मुने ॥ ३०॥ दक्षउवाच ॥ भगवन्किंनविदितंसर्वज्ञस्यमुनीश्वर॥
तथापिवच्मितेसर्वंत्वदाज्ञातोनियंत्रितः॥ ३१॥ अपुत्रस्यगतिर्ना
स्तिनापुत्रस्यसुखंतथा ॥ इतिश्रुत्वाकृतायत्नामयानानाविधामु-
ने॥ ३२॥ तेसर्वेविफलाजातानिर्दैवस्यममप्रभो ॥ कन्याशतंयदेवा
सीत्तत्स्वपत्युर्गृहंगतं ॥ ३३ ॥ तस्मान्मुनेत्वंकृपयाविधेहियथांध
कूपेपतितस्यपूर्वजैः॥ पुत्रोभवेन्मेकृपणस्यदेहिनांहितायनूनंप्रच

रंतिसाधवः॥ ३४॥ इतिश्रीब्रह्मांडपुराणेउमामहेश्वरसंवादेकोकि-
लामाहात्म्येतृतीयोध्यायः॥ ३ ॥ ॥ईश्वरउवाच॥ ॥इतिदक्षे-
णसंपृष्टःकपिलोमुनिसत्तमः॥ उवाचदक्षंराजानंशोकाकुलित
मानसं॥ १॥ श्रीकपिलउवाच॥ कर्मैवसुखदुःखादौकारणंपरिकी
र्तितं ॥ तत्कर्तुमन्यथाकोवाशक्नुयादपिबुद्धिमान् ॥ २॥ वत्सोयथास्व
जननीमेवगच्छतिधेनुषु ॥ तथापूर्वकृतंकर्मकर्तारमनुगच्छति॥ ३॥
त्वयापूर्वकृतंकर्मशिवद्वेषकरंप्रभो ॥ तेनत्वंदुःखितोत्यर्थंसंसारे-
ज्ञानसागरे॥ ४॥ दक्षउवाच ॥ किंवामयाकृतंपूर्वंतन्मेकथयसुव्रत
॥ कथंवामुक्तिमेष्यामितस्माद्दुःखाद्दृढप्रभो ॥ ५॥ श्रीकपिलउवाच॥
पूर्वंत्वमभवःपुत्रोब्रह्मणोमुनिसत्तमः॥ दक्षःप्रजापतिर्मान्यःसर्वेषां
चैवदेहिनां॥ ६॥ धमार्थकामकुशलोगृहीयज्वातिकोपनः॥ त्रयोदशा
भवंन्कन्यास्तवनत्वातिशोभनाः॥ ७॥ तासांदशसुतादत्ताःकश्यपाय

काकि०म० महात्मने॥ एकाग्नये तथैका तु पितृभ्यः प्रतिपादिता॥८॥ एकावसि
ष्टाया कन्या सती नाम सुशोभना॥ तस्या विवाहसमयः समापन्नो विशां
६ पतेः॥९॥ तदा दक्षो वसिष्ठादीन्समाहूय महामुनिः॥ पप्रच्छ कथ्यतां
विप्राः कस्मै देया मया सुता॥१०॥ सर्वासां मे सुतानां हि प्रियेयं वै सती
मता॥ तस्मादस्याः पतिः कः स्यादिति संचिंत्य कथ्यतां॥११॥ इति दक्षेण
संपृष्टा वसिष्ठादिमुनीश्वराः॥ विचार्य जगदुस्तं ते दक्षं नाम प्रजापतिं॥१२
॥वसिष्ठ उवाच॥ ॥तव पुत्र्याः पतिर्नान्यो महादेवान्मुनीश्वर॥ तस्मात्वं
देहि रुद्राय कन्यामेनां सुशोभनां॥१३॥ आत्मारामोपि यः प्रेतैर्भूतैश्चै
व संवृतः॥ क्रीडन्वितनुते स्वानां भक्तानां पोषणं प्रभुः॥१४॥ तस्मै त्वं दे
हि तनयां कल्याणं वांछसे यदि॥ सृत्स्यादिकत जामाता कस्य नेष्टो वद
स्व मे॥१५॥ इति प्रोक्तः स मुनिना दक्षो वै ब्रह्मणः सुतः॥ संभारान्कार
यामास विवाहार्थं मुनीश्वर॥१६॥ सर्वे देवाश्च साध्याश्च मरुतश्च तथ



र्षयः॥ निमंत्रिता विवाहार्थं गंधर्वाप्सरसां गणाः॥ ते सर्वेऽभ्यागतास्तत्र
दक्षगेहे माहात्मनः॥ दिदृक्षवो विवाहं स्यतस्य देवस्य शूलिनः॥१८॥ द-
क्षोथ प्रेषयामास ब्रह्माणं नीललोहितं॥ आनेतुं स जगामाथ कैलासं शंक-
रालयं॥१९॥ सिद्धविद्याधरगणैर्जुष्टं मुनिगणैस्तथा॥ नानालताद्रुमा
कीर्णं नानातिर्यग्गणान्वितं॥२०॥ तत्र तस्याश्रमं दिव्यं ददर्श कमलासनः
शांतं निर्वैरममलमुपशांतजनावृतं॥२१॥ तत्र शीतलसुच्छायन्यग्रोधा
धोनिकेतनं॥ ददर्श स महादेवं पद्मासनसमास्थितं॥२२॥ निमील्य नेत्र
युग्मं स्वे सुखं ब्रह्म निरंतरं॥ भावयंतं स्वभक्तानां ज्ञापयंतं च मुद्रया॥२३
तं दृष्ट्वाथ विरिंच्योऽथो तुष्टाव प्रीतमानसः॥ बहिर्वृत्तिनिधानार्थं देवदेव-
स्य शूलिनः॥२४॥ ब्रह्मोवाच॥ देवावेद्यं तर्कजालैरगम्यं निर्लेपं त्वां निष्क-
लं निर्गुणं च॥ रूपं वाचा वेदमूर्धन्ययायद्गीतं तत्त्वे को विमातुं समर्थः॥२५
त्वं वै भक्तान्स्वांत्समुद्धर्तुकामो नानारूपैः क्रीडसे मोघकामः॥ कोऽलीला
स्तैर्व्यक्तिनो गम्यरूपा लोकातिक्रांतानुभीष्टमनुष्यः॥२६॥ सत्वं देवालो

कयास्मान्प्रपन्नानूद्दध्यास्नेहेनार्द्रयाभक्तसंघात् ॥ विज्ञप्तिंचाकर्णयास्मा
कमीशनित्यंतुभ्र्यंचास्तिदत्तोनमश्च ॥ २७ ॥ श्रीकपिलउवाच ॥ इतिस्तुत्वा
नरस्तदानेनब्रह्मणावृषभध्वजः ॥ प्रीतःप्रोवाचतंभक्तंब्रह्माणंप्रहसन्हरः
॥ २८ ॥ ईश्वरउवाच ॥ ब्रह्मन्वरयसुप्रीतस्त्वरस्तुत्यानयोभवान् ॥ वराहःको
वशिष्येतमयिप्रीतेमनोरथः ॥ २९ ॥ यएतेनत्वत्कृतेनस्तोत्रेणकमलासन
॥ स्तौतिमांतस्यसर्वेपिवरानोदुर्लभामताः ॥ ३० ॥ इतिश्रुत्वामहेशस्यवा
क्यंसकमलासनः ॥ विवाहार्थंचतंसर्वंज्ञापयामासशूलिनः ॥ ३१ ॥ भग
वन्किंनविदितंसर्वज्ञस्यतवानघा ॥ तथापिवच्मितेसर्वंतिवाज्ञातोमनो
रथं ॥ ३२ ॥ दक्षोममसुतस्तस्यकन्याकमललोचना ॥ सतीनाम्नातया
त्वंवैवृतोभवतद्विदानघ ॥ ३३ ॥ तत्संपादयदेवेशममपोष्यामनोरथं ॥ वर-
मेनंवृणेनान्यंत्वत्तोहंवरयेवरं ॥ ३४ ॥ इतिश्रुत्वाविरिंचिस्यवचनंत्रिपुर ७
द्विषः ॥ प्रहस्याहनमेब्रह्मन्विरक्तस्यात्रलालसा ॥ ३५ ॥ तथापिकुर्वेका-

मंतेतवरत्नयाप्रतोषितः ॥ अमोघंवचनंलोकेब्रह्मन्किंमात्वसोपुनः ॥ ३६
संस्थितस्तुत्वनिजस्थानंकामादिविरंचिनःपिचामनतस्चमनः ॥ संस-
श्रुत्वेतितस्यवचनंपुरहरपुरः ॥ इतिस्तुतसङ्गसङ्घः ॥ ३७ ॥ इ
त्यचांथगमनायमतिंदधारभगानुमोदित ॥ चतुर्थोध्यायः ॥ ४ ॥
तिश्रीब्रह्मांडपुराणउपासाकल्पकोकिलामाहात्म्ये
॥ ॥ श्रीकपिलउवाच ॥ ततोविरिंचिरागत्यसतरसदुत्तरान्वितः ॥ पुत्राय
कथयामासशिवभक्तिनमादितः ॥ १ ॥ ततोदक्षःपिसंहृष्टःपितरोकथयं
चितः ॥ मंडपंकारयामासविवाहार्थंप्रयत्नतः ॥ २ ॥ मधुपर्कादिसाहित्य
दक्षोविधिविदांवरः ॥ तत्रापपृच्छजनकंकिंकर्तव्यमतःपरं ॥ ३ ॥ तदाकः
त्वाब्रवीत्पुत्रवरस्यानयनंप्रति ॥ आदौसंप्रेष्यताकश्चित्कशुक्लःशिवंत
त्वविन ॥ ४ ॥ इतिश्रुत्वापितुर्वाक्यंदक्षःप्रोवाचतंतदा ॥ भृगुर्मेयाप्रसुतः
ग्रभ्रातामम हितेरतः ॥ ५ ॥ तच्छुत्वाविश्वसृड्वाक्यंसुतस्यपरिशंकितः ॥
अनुमोदितवांस्तंसमनस्येवंविचारयत् ॥ ६ ॥ भृगुर्गत्वाबहिःशीलं
हस्त्वासंकथयिष्यति ॥ यदिदक्षायकंभूयादितिसंचिंत्यसत्वरः ॥ ७ ॥

को: मै
८

विघ्नेशंमनसाध्यात्वोवाचदक्षंभृगुंसुतं ॥ भोदक्षप्रेष्यतांभ्राता भृगु
स्तवाहितेरतः ॥ ८ ॥ भृगोत्वयातत्र गत्वासान्त्वनेयःशिवोत्रवै ॥ नोचे
त्सनिस्पृहोनात्रागंतात्मारामधूर्वहः ॥ ९ ॥ इतिश्रुत्वापितुर्वाक्यंभृगुः
कैलासमागमत् ॥ ददर्शशिवमासीनंसमाधिस्थमहर्निशं ॥ १० ॥ भू
तप्रेतपिशाचैश्च संवृतंविकटाननैः ॥ जानुवक्रैःपादवक्रैःपादवक्रैः
समंततः ॥ ११ ॥ शवासनोपविष्टंच भुजगालंकृतंतथा ॥ निषेधविधि-
भिस्त्यक्तं मात्मारामंवृषध्वजं ॥ १२ ॥ दृष्ट्वातंतादृशंसोथ भृगुर्ब्रह्मसुतस्त
दा ॥ अनादरेणतद्वृत्तं कथयामास खिन्नधीः ॥ १३ ॥ भृगुरुवाच ॥ कुटुल-
याविवाहायागम्यतांसत्वरंगणैः ॥ दक्षःप्रतीक्षतेहित्वां सर्वसंपाद्यकर्मभिः
॥ १४ ॥ अतस्त्वयाप्रयत्नेन गंतव्यंयदिरोचते ॥ नोचेत्तवेदृशींवृत्तिंदृष्ट्वा
कन्यांनदास्यति ॥ १५ ॥ इत्युक्त्वासभृगूरुद्रंदक्षमागत्यसत्वरः ॥ कथया
मासतत्सर्वंदक्षायाथाभिमानिने ॥ १६ ॥ तच्छ्रुत्वाभ्रातृवचनंदक्षोथोवाच

पद्मजं ॥ नदीयतेमयाकन्यारुद्रायामंगलायहि ॥ १७ ॥ भृगूणाकथितं
सर्वंरुद्रचेष्टितमादितः ॥ श्मशानवासःप्रेतैश्चक्रीडानित्यममंगलैः ॥ १८
तस्मान्नैवसुतांदास्येसदृशायपितःखलु ॥ ययोर्धनंचधर्मश्चवृत्तंचैव
समंभवेत् ॥ १९ ॥ संबंधायैतयोरेवनान्ययोरितिमेमतिः ॥ इतिश्रुत्वादक्ष
वाक्यंबभाषेकमलासनः ॥ २० ॥ ब्रह्मोवाच ॥ किमिदंभावसेदक्षतस्मि
न्भावयतित्वया ॥ आत्मारामेहितेवास्तिकुलशीलादिकल्पना ॥ २१ ॥ सदा
चरणतोह्यर्थःकोवेस्यादस्यमेवद ॥ दुराचरणतोनर्थोसिंगस्यपरमात्म
नः ॥ २२ ॥ मायामयःप्रपंचोयंनास्त्यस्मिन्कर्हिचित्सुत ॥ तस्मात्सपश्यति
समंप्रेतावासंगृहंतथा ॥ २३ ॥ इंद्राद्याःप्राप्नुवंत्यस्यकृपालोकनमात्रतः
स्वर्गादीनिपदान्यस्यवदकिंदुर्लभंभवेत् ॥ २४ ॥ तथाप्युत्स्ना संचरति
कृत्तिवासापिशाचकैः ॥ नृत्यतिप्रेतसदनेतेनकिंतस्यमेवद ॥ २५ ॥ तस्मा
द्देयात्वयाकन्यामद्वाक्यगौरवात्सुत ॥ नोचेदागत्य किंकुर्यात्सनजानेहमप्यु
त ॥ २६ ॥ इत्युक्तःसतदादक्षोजनकेनसुदुर्मनाः ॥ उरीकृत्यपितुर्वाक्यंच

को॰म॰ क्रेसामग्निकंलनः॥ २७॥ अथदेवोपिविदधेगमनायमतिंभवः॥विवा
९ ह मंडपंरम्यंदक्षस्यसुदुरात्मनः॥२८॥ सर्वभूतगणैःसाकंनानावाद्यध
रैस्वयं॥२९॥ वृषमारुह्यनिखिलैरायुधैःपरिशोभितः॥२९॥जानन्नपि
माहादेवोभिप्रायंदक्ष कस्यवै ॥अजानंनिवतत्सद्मजगामानंदसंप्लुतः
॥३०॥ समागतंविलोक्याथपद्मभूर्वृषभध्वजं ॥दक्षमागम्यचाकिंतो
बभाषेहर्षसंप्लुतः॥३१॥ब्रह्मोवाच ॥किंस्थीयतेत्वयादक्षस्वस्थंदेवस
मागतः॥ तत्संमुखंसमागच्छसुहृद्भिःस्त्रिगणैस्तथा ॥३२॥ इतिश्रुत्वापि-
तुर्वाक्यंनातिप्रीतमनाःसुतः॥दक्षस्ततोमुनिगणैःसमागच्छच्छिवंपरं॥३३
ससमीपंसमभ्येत्यधृत्वादेवंकरेतदा॥आनयामास भवनंनिजंमंगल
संयुतं॥३४॥तन्निवासायविदधेगृहमन्यद्दिधेःसुतः॥तस्मिन्निवेशयामा ९
ससगणंवृषभध्वजं॥३५॥आतिथ्यंविदधेःसर्वसिगणस्यशिवस्यहि॥अ
न्नपानादिदानेनपद्मभूसंभवस्तथा॥३६॥तस्मिन्माहात्माभगवानवास्थि-
तस्तदा [illegible]

तोगणैःसहानंदघनस्वरूपतः॥ विडंबमंनूजीवगणैस्वकर्मभिःकुर्वन्हितं
भक्तगणस्यलिलया॥३७॥इतिश्रीब्र॰राणेकोकिलामाहात्म्ये पंचमोध्याः
यः॥५॥ ॥श्रीकपिलउवाच॥ ॥अथदक्षःपरिवृतोज्ञातिभिःप्रीतमा
नसः॥ पित्रानुमोदितश्चक्रे पुंण्याहस्यविधींस्वयं ॥१॥ पुण्याहंवाच
यित्वादौब्राह्मणैःकश्यपादिभिः॥नांदीश्राधादिकंचक्रे कन्याभ्युदयका
रणं॥२॥ततःपद्मभवोगत्वाशिवमंदिरमादरात्॥ विचारयामाससमा
हूयविष्णुंविवेकिनं॥ ३॥ब्रह्मोवाच ॥ भगवन्वद किंकार्यंयेनसिध्येद
यंविधि॥ येनकेनापिविधिनाविवाहस्याद्यथावद॥४॥श्रीविष्णुरुवाच
॥ कर्मयद्यानमानंस्यात्तदहंकर्तुमुत्सहे ॥ पौरोहित्यंत्वयाकार्यंविवाहेप
द्मसंभव॥५॥ श्रीकपिलउवाच॥ तौमिथःसमयंकृत्वाशिवमूचतु
रादरात् ॥देवावाभ्यांनियुक्तंयत्तत्कार्यंभवताप्रभो॥६॥ आवयोर्योभवे
द्देवपूरणीयोमनोरथः॥आत्मारामस्यतेनैववांछात्रखलुदृश्यते॥७॥

सर्वकार्यंसाधयावोविवाहेयथितंभवेत् ।।त्वयाकिमपिनोवाच्यंसाधुवा
साधुशंकरः ।।८।।ततोनुमोदितौतौतु ब्रह्मविष्णुमहामती ।।कारयामास
तुःप्रीतौमंडपंविश्वकर्मणा।।९।। ततोविष्णुश्चकारासौपुण्याहस्यविधिं
नृप। ब्रह्मणासाकमृषिभिर्वसिष्ठादिभिरादरात्।। १०।। अथब्रह्मासुत
गृहं समागम्याब्रवीत्सुतं ।।दक्षायनस्वभवनंशंकरंनीललोहितं ।।११।।
ततोदक्षोमुनिगणैस्त्रीगणैःपरिवारितः।।आनयामाससदनेनिजदेवंपि
नाकिनं।।१२।। विष्णुर्देवगणैःसाकंतत्पत्नीभिश्चसंयुतः।।लक्ष्म्यासमन्वि
तोहृष्टोनुगतोवृषभध्वजः।।१३।। तदाभेर्योदुंदुभयोवादिताःसिद्धचारणैः
अप्सरोभिस्तथानित्यमारब्धंगीततालवत्।।१४।। ब्रह्मघोषेणमहता
वादित्राणांतथास्वनैः ।।जगामयजमानोथविष्णुर्दक्षस्यमंडपं।।१५।। द्वा- १०
रदेशेसमानीयदेवंदक्षःप्रजापतिः।।पूजयामासविविधैर्वस्त्रोभिर्भूष
णैस्तथा ।।१६ ।।ततोनीत्वामंडपांतेदेवंदक्षोब्रवीद्भृगुं।। सतीमानय

शीघ्रंत्वंभूषितांमेसुतांभृगो ।।१७।।भृगुर्गत्वाथभवनेदक्षपत्नींसमब्र
वीत् ।।अल्पंलग्नमिदंशिघ्रंसुतामानयसत्वरं।। १८।। ततःसादक्षपत्नी
तांकन्यामादायमंडपं ।।आनयामासनृपतेवस्त्रालंकारभूषितां।।१९।।अंतः
पटंदधाराथब्रह्माचैकत्रकश्यपः।।कन्यावरौतूभयतस्तस्थतुःपृथिवी-
पते ।।२०।। शिवोपिलज्जितइवतस्थौविष्णुसमीपतः।।इंदिराद्याःस्त्रियः
सर्वाःशिवमावृत्यतास्थिरे ।।२१।।तदाद्विजाःसदाचारावसिष्ठाद्याःसुमंग-
लैः।।वाद्यध्वनिभिराकीर्णेमंडपेमंगलंजगुः।।२२।। अंतःपटंमध्यगतेमप
सार्यददौविधिः।।ज्योतिर्विन्मुख्यगर्गायिजग्राहसपटंतदा ।।२३।। कन्याप्र
दानंसविधायदक्षोवस्त्रैःतथाकल्पवरैरपूजयत् ।।वधूवरौविष्णुविरिं
चिकश्यपावसिष्ठकण्वःप्रभृतिंद्विजोत्तमान् ।।२४ ।। एवंविवाहंचविधा
यदक्षःसत्यास्तदाखिन्नमनाबभूव ।। पिशाचभूतप्रमथेश्वरायसुताम
यासंप्रतिपादितेतिसः।। २५।। सतीनुसंप्राप्यशिवंपतिंतदामेनेस्वमात्मा

कौ॰म॰ नमवासकामं॥ भजेमुदाहर्निशमादरेणतादिगितज्ञापरिमुक्तिकामा॥२६॥
११ दक्षोथसर्वान्त्सिमर्थ्यां भोजयत्सताञ्चानाविधेनान्नरसादिनान्नृप॥ तांबूलगं
धादिभिरादरेणप्रतोष्यसर्वान्त्सिमयापयत्सः॥२७॥ सतींसमादायततः
शिवोपिजगामवेधप्रमुखैःसुरेशैः॥ कैलासमद्रिप्रवरंपिशाचभूतादिसं
घैःपरिवेष्टितोनघः॥२८॥ गत्वाकैलासमीशःसकलसुरगणैःसंवृतोब्र
ह्ममुख्यैःसर्वान्नूचेखिलार्थंश्वशुरमरणदंभाविनस्वापमानात्॥श्रुत्वा
तद्ब्रह्ममुख्याःप्रचलितमनसःप्रार्थयामासुरीशंमाभूदेवंसुरेशप्रमथगण
पतेनुग्रहंसंविधत्स्व॥२९॥तदाब्रवीद्देवगणान्कपर्दीप्रहस्यकिंकार्यमि
हापरेशः॥ योयेनभावेनसमाभजेन्मांतथैवतेनाप्यतएवतत्फलं॥३०॥
अनर्थकारिण्यपितद्विरोधेमयापिहंधर्मकरंव्रतंस्यात्॥जनार्निहिंस्त्रीसु ११
खदंसुरेशाःसत्याभवेत्कोकिलजन्मयत्र॥३१॥इतिदमुक्त्वाभगवान्स
तीमुखंविलोक्यकिंचिद्विमनाइवाथ॥सर्वान्त्सिमाज्ञापयदादरेणब्रह्मेंद्र

मुख्यान्भवनानिगंतुं॥३२॥ततस्त्वनुज्ञाप्ययुःसुरेशावैकुंठनाथादयआ
त्मलोकान्॥सत्यासहप्रीतमनाःशिवोपितस्मिन्क्षितिभ्रेसमुवासनित्यं
॥३३॥ इतिश्रीब्रह्मां॰ राणेउपासनाकल्पेकोकि॰ माहात्म्येषष्ठोध्यायः॥६॥
॥कपिलउवाच॥ ॥एवंकालेगतेराजन्कदाचिद्ब्रह्मवादिनः॥आरेभि
रेविश्वसृड्जोमरवंमुनिगणैःसह॥१॥तस्मिन्मखेसमाहूताविश्वसृग्भिः
सुरेश्वरः॥मुनयश्चययुस्ताभिर्मुदायुक्ताःपरंतप॥२॥ब्रह्मविष्णुस्त
थारुद्रोमरुतश्चाश्विनौयमः॥कुबेराद्यालोकपालाःसेंद्रागंधर्वसंयु
ताः॥३॥एवंसर्वेस्वागतेषुपूजितेषुयथार्हतः॥आजगाममहातेजा
दक्षस्तत्रप्रजापतिः॥४॥तमागतंसमालोक्यप्राङ्निषण्णामह
र्षयः॥तथामरगणाःसर्वेसुत्थायापूजयन्नृप॥५॥ब्रह्मौविष्णु- भवश्च
श्वनोत्तस्थुस्तंविलोक्यच॥यतस्तेजगतःश्रेष्ठाःसृष्ट्यादिविनिव
र्तकाः॥६॥सतुदक्षःस्वपितरंनत्वामोक्त्वास्वनामयत्॥विष्णुंत
तःप्रणम्याथशिवमालोक्यविस्मितः॥७॥ मनस्येवंविचारंसकृत

वान्कोपितोभृशं ॥ अहोमांप्राप्तमालोक्याप्ययंनोसत्करोतिही
॥ ८ ॥ तस्मादस्य विधास्येहंजामातुरपिशासनं ॥ इतिनिश्चित्यम-
नसीसृष्टंप्रोवाचसंसदि ॥ ९ ॥ अरेरुद्रकिमेवंतेचेष्टितंकथ्यतांमम ॥
कन्याममयदादत्तातदाहंगुरुरस्मिते ॥ १० ॥ तथापिप्राप्तमालोक्यमां
नोसत्कुरुषेततः ॥ देवैःसहाभिभागस्यतवमास्त्वमराधम ॥ ११ ॥
लोकाचारंलंघयसिमूढस्त्वंपापपूरुषः ॥ तस्मादेवंविधोदंडोयुक्तस्त्
वमयाकृतः ॥ १२ ॥ पुनरेवंविधंमंदप्रमादंमाकुरुष्वहि ॥ किंकरोमि
स्वपित्राहंप्रतारितउदांसुतां ॥ १३ ॥ इत्येवमुक्त्वारुद्रंससर्वान्नूचेस 
भासदः ॥ सभ्यायूयंमादयध्वंमेनंदेवाधमंमृडं ॥ १४ ॥ एवंशयानदक्षे
पिशिवोनोवाचाकिंचन ॥ यदानदाहनंदीतंमानिनंब्राह्मणाधमं ॥ १५ ॥
नंदीश्वरउवाच ॥ यस्मात्वंनिंदसिशिवंशांतंनिरपराधिनं ॥ तस्माद
जमुखोभूत्वापकीर्तियास्यसिक्षितौ ॥ १६ ॥ कत्वंविप्राधमोदक्षक-

चारमायंसुरेश्वरः ॥ एतस्मान्मानकामस्त्वंनजिह्वेषिकथंवद ॥ १७ ॥
शिवनिंदानुमोदस्यफलंद्रक्ष्यंतुपापिनः ॥ प्रत्यक्षमत्रभवतोनराधम
शृणुचतत् ॥ १८ ॥ येदक्षमनुवर्तंतेसूचयंतिचतंद्विजाः ॥ तेविरूपाभ
विष्यंतिशिवनिंदापरायणः ॥ १९ ॥ शिवतत्वमविज्ञाययेचनिंदंतितंकि
यां ॥ तेकालसूत्रेनरकेपतंतिमनुजाधमाः ॥ २० ॥ ब्रह्मादयोपिनविदुर्य
त्तत्वंतत्वतस्त्वतः ॥ यसद्रजोमूर्ध्निनित्यंदधतेपरमादृतः ॥ २१ ॥ तंशिवं
परिपूर्णत्वमल्पकंदक्षमंदधीः ॥ अशिवंकल्पयन्मूढाशिवएवभविष्य
सि ॥ २२ ॥ शिवंशिवस्वरूपेणयश्चिंतयतिशुद्धधीः ॥ शिवतत्वंसवि
ज्ञेयोनिश्चितंनात्रसंशयः ॥ २३ ॥ एवंशपतितस्मिन्सनंदिप्रथमाधिपे
॥ निश्चक्राममखात्किंचित्खिन्नोवाखिन्नमानसः ॥ २४ ॥ दक्षोपिराज
गामाथाश्रमंस्वंपृथिवीपते ॥ तमेवार्थंचिंतयत्वैशिववैरपरायणः ॥ २५
ब्रह्मादिषुप्रयातेषुसुरेषुस्वनिकेतनं ॥ तेप्रजापतयःस्नात्वावभृथंस्व
र्गतिंगताः ॥ २६ ॥ ततःकालेकतिपयेगतेथमनुजाधिप ॥ शिवानादर

कामार्थंदक्षःप्रारब्धवान्मखं ॥२७॥तस्मिन्मखेसुराःसर्वेऋषयश्च
तपोधनाः॥आहूताःप्रीतियुक्तेन दक्षेणाशिववैरिणा॥२८॥सर्वानाहू
यदक्षोभृगुभगसहितःप्रारभद्यागमुच्चैःशांतंनाकारयित्वापरशिव
ममलंपुष्टिदातारमीशं॥सर्वस्याप्येवमेवप्रभवतिहिमतिर्नुर्निनं
क्षोर्नृपेंद्रोदकंकोमाष्टुमीशःशिवमशिवमथोनोविनिंदंतिसंतः॥२९
तस्मिन्यज्ञवरेसुराःसमुनयोगंधर्वदेवांगनासंघाःसर्वतआग
ताविविधवराभ्रादिसंभूषिताः॥कन्याःस्वस्ववरैरनर्घ्यवसनैर्नेपथ्य
रत्नैस्तथाजुष्टाःस्वासुसमासतीस्वतनयानाकारितेशाद्विषा॥३०
तदाप्रसूनिर्दयिताशशंसभर्त्रेस्वपुत्र्यानयनायराजन्॥नारीच्चका
राज्ञभवांगसंभवःप्रायोमतिर्भाविसमोल्लसेन्नरे॥३१॥इति
श्रीब्रह्मांडपुराणउपासनाकल्पेकोकिलामाहात्म्येसप्तमोध्यायः
॥७॥ ॥श्रीकपिलउवाच॥ ॥तस्मिन्यज्ञेसंप्रवृत्तेवसिष्ठोमुनि



सत्तमः॥दक्षंबभाषेप्रत्यूहाद्भीतस्तद्भावुकेच्छया॥१॥ वसिष्ठ
उवाच॥ ॥भोभोदक्षशृणुष्वैतद्वचनंममसत्तम॥सहसानारभे
त्किंचित्प्रमादःपदमापदां॥२॥सृष्ट्यादिकर्तायोदेवस्तमनाहूत्यमू
ढवत्॥ किमिदंकुरुषेदक्षकृतघ्नस्त्वंसमेष्यसि॥३॥कृतघ्नेनिष्कृतिर्ना
स्तिकृतघ्नेनास्तिभावना॥कृतघ्नःकुरुतेयद्यत्तन्नतस्यफलभाग्भवेत्
॥४॥तस्मादाकारयात्रत्वंशिवंशांतंसतीपतिः॥तस्मिन्समागतेसर्वेप्या
गताइतिनिश्चितु॥५॥यदिनात्रागतःशंभुस्तदासर्वेसमागताः॥
नागताएवविज्ञेयास्त्वयानात्रविचारणा॥६॥इतिमैत्रावरुणिनाबो
धितोपिविरिंचिभूः॥नांगीच्चकारतद्वाक्यंजगादचतदामुनिं॥७॥
दक्षउवाच॥ कर्मैवकारणंप्रोक्तंसुखादौमुनिपुंगवैः॥ईश्वरःकिंक
रोत्यत्रकर्माधीनोमेमुनेवद॥८॥यदिदातापिभवेत्सोपिसुखादेस्त
र्हिशंसमे॥अकर्तानाप्यतेपुष्टिःकुतस्तद्व्यर्थएवसः॥९॥किंचायं

नेश्वरोरुद्रःप्रमत्तोतीवमूढधीः॥सदाचारपथैभ्रष्टःकुणपावासतु
ष्टधीः॥१०॥तस्मान्मुनेतदाज्ञानादन्यद्यद्यन्नियुज्यसे॥तदहंसर्वमे
वात्रविधास्येत्वद्वचोनुगः॥११॥इतिश्रुत्वादक्षवाक्यंतूष्णींभूतामुनी
श्वराः॥नोवाचकिंचिन्मनसिशिवंशरणमाययो॥१२॥एतस्मिन्नंतरे
राजन्सर्वेदेवामहर्षिभिः॥विमानैःसोत्सवाजग्मुर्दक्षयज्ञेसमंत-
तः॥१३॥तान्गच्छथोनिरीक्ष्याथसतीकैलाससंस्थिता॥तद्वचश्च
समाकर्ण्यभर्तारमिदमब्रवीत्॥१४॥सत्युवाच॥भगवन्स्थीय
तेकिनुत्वयाममपितुर्गृहे॥यज्ञोत्सवःसंप्रवृत्तोमुनिमंडलमंडि
तः॥१५॥अन्यास्त्रियोपिपतिभिर्यांतिदेवाविलोकय॥विमानशी
घ्रगतयोवस्त्रालंकारभूषिताः॥१६॥पितृसद्मोत्सवंश्रुत्वाक
थंस्थास्यतिकन्यका॥तस्मान्मयासहविभोचलयज्ञमहोत्सवं॥१७
अनाहूतेनकस्यापिनगंतव्यंगृहेक्वचित्॥अजन्मनोकर्मणश्चत

स्मान्नोक्तंवितोभवान्॥१९॥मातरंपितरंद्रक्ष्येपितुर्मातुस्तथात्म
नः॥भगिनीःसुहृदःप्रेम्णास्नेहाकुलितचेतसः॥२०॥श्रीकपिल
उवाच॥इतिश्रुत्वासतीवाक्यंजगादत्र्यंबकस्तदा॥संस्मरंदक्ष
वाक्यानिमनस्तापकराणिच॥२१॥श्रीशिवउवाच॥सत्यंत्वयो
क्तमेतद्धिसुहृद्भिःसुहृदांगृहं॥गंतव्यमितितेचेत्स्युःप्रीतियुक्ताः
सुरेश्वरी॥२२॥दक्षोममाहिद्रुद्व्यितेततस्त्वंनोनिग्रहंमांप्रतिसंवि
धत्स्व॥त्वयामयावापिनतत्ररोचयेसमागमंतस्यदुरात्मनःपितुः॥२३
महतांवयोगुणादिप्रसमीक्ष्यविलज्जितादुरात्मानः॥अशक्नुवंतः
प्राप्तुंततःप्रवृत्ताभवंतिनिंदायां॥२४॥तस्मिन्यज्ञेविश्वसृजांय
त्सजगामतुंमांप्रत्यप्रतिकुलंजनकस्ते॥तत्स्मृत्वात्वंयत्करणीयं
कुरुदेवित्वांनोहंवैप्रमनस्कांप्रविदध्यां॥२५॥श्रीकपिलउवाच॥
एवंश्रुत्वारुद्रवाक्यंतदासादोलायंतीनैवकिंचिज्जगाद॥गंतव्यंवा

को॰म॰
१५

नोविचार्येत्थमेषायानेयज्ञंनिश्चित्तासाबभूव ॥२६ निश्चितांगमना
याथजगादानंगहासतिं ॥ गच्छत्वंवारयेनत्वांपितृसद्मरुचिंसती ॥२७
नैतनदेहेनमयासयोगस्तेभविष्यति ॥अनादरंविलोक्यस्वत्त्वंदेहं
त्यक्ष्यसीक्रतौ ॥२८॥ इतिब्रुवतिरुद्रेपिसतीस्वपितृमंदिरं ॥ निर्गतां
तांविलोक्याथानुजग्मुःसर्वशोगणाः ॥२९॥ नंदिपृष्ठेसमारोप्यगणा
स्तेस्वपतेस्त्रियं ॥ तदीयंकंदुकादर्शसारिकाद्याददुःपरे ॥३०॥ एवं
तेसिंहनादेनगर्जंतोरुद्रपार्षदाः ॥यज्ञभूमिंसमापन्नाःसत्यास्त्वस्वा
मिभार्यया ॥३१॥ ततःसतीयज्ञशालांविवेशैकाकिनीबहिः ॥अव
स्थाप्यगणान्सर्वान्शिवपत्नीरुषान्विता ॥३२॥ तत्रदृष्ट्वासुरान्सर्वा
न्ब्रह्मविष्णूविनानृप ॥ शंकरंचविनादृष्ट्वाभागान्स्वान्दृ हृतो
नृप ॥३३॥ ब्रह्मविष्णुसमाहूतावपिरुद्रंविनाध्वरं ॥ ज्ञात्वानुजग्म
तुरस्तत्रदक्षयज्ञेमहामती ॥३४॥ भृगुकश्यपकण्वादीनृत्विक्कर्म

सुनिष्ठितान् ॥ भगिनीःपतिभिःसार्धंस्वस्रूर्मातुःपितुस्तथा ॥३५॥
विलोक्यखिन्नामनसिपतिवाक्यंस्मृतिगता ॥ दक्षभीत्यानमांको
पिसत्कारयतिवैजनः ॥३६॥ तदासतीसाकुपिताजगादविलोकयं
तीपितरंशिवद्विषं ॥ नेत्रेणरक्तेननिवार्यतान्गणान्समुत्थितान्यज्ञवि
घातकान्नृप ॥३७॥ इतिश्रीब्रह्मांडपु॰कोकिलाम॰ अष्टमोध्यायः ॥८॥
॥ ॥सत्युवाच ॥ अहोचित्रंमयादृष्टमधमोपियतोभवान् ॥ उत्तमं
मंन्यतोदेवमधर्मस्त्वात्मवान्शठः ॥ त्वादृशाएवकींसर्वेमूर्खादक्षव
दस्वमे ॥ ब्रह्मादयोपियस्यांघ्रिरजोमूर्धनिबिभ्रति ॥२॥ तंत्वंनिंदित
वान्मंदवंद्यंसेंद्रैःसुरेश्वरैः ॥ फलंप्राप्स्यसिमंदत्वंपापस्यकृतकर्म-
णः ॥३॥ त्वत्तोजातमिदंमेगंपापात्मश्रीशिवनिंदकात् ॥ नधारयिष्यो
हंकिंमेत्वधेनेनवदनिर्भर्तौ ॥४॥ मोहाद्यद्भक्षितुंचान्नंदुष्टंतच्छर्दितं
भवेत् ॥ नदोषकृत्तथात्वेनदंगंत्यक्तंनदोषकृत् ॥५॥ इतोगत्वाकिं
वदिष्येशिवायपरमात्मने ॥ तस्मात्मेसांप्रतंमृत्युरकीर्तेर्जीवितेनकिं ॥६॥

आगस्कारिभवेद्यस्तु महतां तज्जनिरुषा ॥ धिग्धिग्दक्षीतार्यैनस्मात्यक्षेत्रा ॥ स्कंदपुराणे

॥ श्रीकपिलउवाच ॥ इत्युक्त्वा यज्ञशालायां दक्षिणाग्नौ सती जहौ
कौ॰म॰ १६ ॥ दहंतदा जना सर्वे हाहाकारं प्रचक्रिरे ॥ ८ ॥ माता मातृषसारश्च भगि
न्यश्च सभर्तृकाः ॥ चुकुशुर्धविधा वेलि सतीनिकाशयेति च ॥ ९ ॥ एवंवि
क्रोशमानेपि सर्वस्मिंस्तत्र वै जने ॥ दक्षो जगाद नो किंचित्कर्मासक्त्याति
मंदधीः ॥ १० ॥ ततो नंदीमुखाः सर्वे गणाः क्रुद्धाः समंततः ॥ अधावन्नृ
क्षघातार्थं भृगुस्तान्प्रत्यषेधयत् ॥ ११ ॥ सोमप्राशनतस्तुष्टा ऋभवो नाम
देवताः ॥ जघ्नुस्तान्गणसंघांस्ते अलातैः पृथिवीपते ॥ १२ ॥ ततः पराजि
ताः सर्वे गणा याताः शिवालयं ॥ कथयामासुः सर्वं ते सतीनाशादिकं च
यत् ॥ १३ ॥ तच्छ्रुत्वा भगवान्रुद्रः शुको पार्ती व मारिष ॥ उत्थाय च ततः को
पाज्जटां भूमावताडयत् ॥ १४ ॥ तत उत्पेततुरुभौ गणौ परमकोपनौ ॥ वी
रभद्रश्च भृंगी च जगत्संहारकारकौ ॥ १५ ॥ तौ नत्वा शिवपादाब्जं प्रांज
लि प्रोचतुः शिवं ॥ भगवन्देहि नावाज्ञां किं कुर्वः सेवनं तव ॥ १६ ॥ त

तोनुज्ञापयामास शिवस्तौ स्वगणौ युवां ॥ गत्वा दक्षमखं तस्य कुरुतं
नाशनं द्रुतं ॥ १७ ॥ ततोनुज्ञापितौ तेन गणौ तौ पृथिवीपते ॥ प्रमथैः स
ह यज्ञं तं जग्मतुः कुटिलाननैः ॥ १८ ॥ कुब्जैः खंजैर्वामनकैर्बहुवक्त्रै
श्च पञ्चमुखैः ॥ गर्जद्भिः संमुखेनेव पिबद्भिः पृथिवीतलं ॥ १९ ॥ मज्जयद्भि
रिवा[illegible]थौ तैश्चरणानां समंततः ॥ दिशः खादद्भिरिव तैर्जग्मतुस्तौ गणौ
नृप ॥ २० ॥ तेषां पादाघाततस्तो रेणुरुत्पतितो महान् ॥ तं दृष्ट्वा यज्ञशाला
स्थाः स्त्रियः प्रोचुर्मिथस्त्विदं ॥ २१ ॥ सतीनाशनतः क्रुद्धो रुद्रो नूनं करि
ष्यति ॥ महानर्थं जगत्यत्र न किंः क्षेमी तद्विरोधतः ॥ २२ ॥ इति स्त्रीणां
समूहे पुभापमाणेषु सर्वशः ॥ तौ गणौ प्रमथैः सार्धं प्रविष्टौ तं महाक्र
तुं ॥ २३ ॥ केचित्सदस्यान भन्वै ऋत्विजः केचिदाददुः ॥ देवान्पालाय
मानांश्च जघ्नुरन्ये तदा गणाः ॥ २४ ॥ कुंडानि केचिद्व्यभिंदुरे केग्नींश्च व्य
नाशयन् ॥ स्त्रियः केचिच्च केशेषु धृत्वा वस्त्राणि चाददुः ॥ २५ ॥ वीरभ

द्रस्तदात्वभृगोश्मश्रूणिचिच्छिदे ॥रदनान्पातयामासपूष्णो रुद्रगणाः
ग्रणीः॥२६॥भगस्यनेत्रेभगवान्वीरभद्रोव्यनाशयत् ॥दक्षमातु
श्चकर्णौचिचिच्छेदातिरुषान्वितः॥२७॥येयेदक्षानुयातारोदेवाश्चर्षि
गणास्तथा॥तेप्येवमेवसर्वेपिविरूपाद्यभवन्गणात्॥२८॥यज्ञ-
शालांददाहाथवीरभद्रोतिकोपनः॥तदादक्षंपलायंतंदधारप्रमथा
धिपः॥२९॥उत्कृत्यतस्यशीर्षंतुजुहावाग्नौगणाधिपः॥भृंगिणापि
तथासर्वेनाशितादेवतागणाः॥३०॥एवंसायज्ञशालाशवशयनिभा
वीरभद्रेणसर्ववीरैःसर्वैर्गणेशैरपिनृपविहितालक्ष्मणादेवघोरा॥ज्ञ
त्वाज्ञांवीरभद्रःशिवचरणयुगंप्राप्यनत्वाब्रवीतत् सर्ववृत्तंमखादि
प्रमथनमथतच्छ्रुत्वांस्तोषमाप॥३१॥इतिश्रीब्रह्मांडपुराणेउपा
सनाकल्पेकोकिलामाहात्म्येनवमोध्यायः॥९॥ ॥श्रीकपिलउवा-
च॥ ॥अथशुश्रावभगवान्ब्रह्माविष्णुश्चतंनृप॥यज्ञभंगादिकं

सर्वंदक्षनाशंतथैवच॥१॥तावुभौजग्मतूरुद्रमनुनेतुंसुरोत्तमौ
कैलासशिखरासीनंदक्षयज्ञविनाशकं॥२॥तौदृष्ट्वाशंकरंदेवौस
मालिंग्यपरस्परं॥नत्वास्तुत्वाचपृष्ट्वाचकुशलंसन्निषेदतुः॥३॥देवो
पिशंकरस्ताभ्यांसत्कारंकृतवांस्तदा॥आत्मारामोपियस्तस्यहि-
तार्थंदेहधृक्कथंभूत॥४॥अथब्रह्माप्रहस्याहभगवंतंवृषध्वजं॥द
क्षयज्ञप्रीणनार्थंजीवनार्थंसुतस्यच॥५॥ब्रह्मोवाच॥भगवन्किमि
दंतेद्यचेष्टितंवदमेहर॥जगत्संहारकर्तुस्तेदक्षेक्रोधोनयुज्यते॥६॥
आप्तकामस्यनैवास्तिजीववन्मानवासना॥अतस्त्वयाकृतमिदं
गि नसम्यग्भातिमेमतिः॥७॥क्रोधस्यावसरोनैववक्षुद्रेजीवेमहेश्वर॥तस्मा
त्संतनुमत्पुत्रयज्ञंदक्षंचजीवय॥८॥त्वयाक्षम्यायस्यमार्गेयियं
ज्ञादिःप्रेरितोनघ॥स्वयंकृतस्यनाशोहीमहतान्नैवयुज्यते॥९॥किं-
चलोकानयक्ष्यंतिदक्षयज्ञविनाशनं॥दृष्ट्वात्वत्तोतिभीत्यातत्सां-

को॰म॰ १८ प्तंनकृतंत्वया॥१०॥पामरःपयसादग्धरसनःफुत्करोतिहि॥पातुं
तक्रंतथैवैतज्ज्ञात्वादेवावलोकय॥११॥तवापियदिकोपस्यात्प्राकृतेषु
जनेषुहि।तदाकंयांतिशरणंलोकाःकथयशंकर॥१२॥तस्मादुभि
ष्ठभगवन्भावाभ्यांसहितंमखं॥आयाहित्वांविनानैवप्रापणंप्राप्स्य-
तिक्रतुः॥१३॥श्रीकपिलउवाच॥इतिप्रोक्तोविरिंचेनप्रहस्याहवृष-
ध्वजः॥विष्णुंदक्षिणनेत्रेणसूचयन्कमलासनं॥१४॥श्रीशिवउवाच॥
ब्रह्मन्सत्यंत्वयोक्तंयत्क्रोधोममनियुज्यते॥दक्षेणयत्कृतंकर्मतत्क-
थंतस्ययुज्यते॥१५॥आस्तांतदज्ञलोकानांभाषितंकिमहंब्रुवे॥यज्ञे १८
विश्वसृजांदक्षोयज्ञगादात्मजस्तव॥१६॥तदहंनैवमनसीचिंतयेक
मलासन॥प्राकृतानांसाध्वसाधुकिंचित्स्यंवचनंवद॥१७॥तथापितेषां
मूढानांविद्यादिभिरनुत्तमैः॥हितार्थेयिंकृतोदंडोनक्रोधान्नचमत्सरा
त्॥१८॥पुनरेवंनकुर्याद्धियथायंचतवात्मजः॥तथामयाकृतोदंडो

मारिवदःकमलासन॥१९॥पुनस्तस्यकृतस्सोथजीवनांप्रभस्य
द्रतः॥दक्षःसर्षिगणोदेवाजीवंतुकमलासन॥२०॥श्रीकपिलउवा-
च॥इत्युक्त्वाजभगांदेवोब्रह्मणाविष्णुनातथा॥सहितःप्रमथैश्चैव-
वृषमारुह्यनिर्ययौ॥२१॥सगत्वायज्ञशालायांब्रह्मविष्णुसमेतः न्वि
॥कृपयावलोकयामाससर्वान्सर्षिगणान्सुरान्॥२२॥तेसमालोकि
ताःसर्वेशिवेनपरमात्मना॥सुप्तोत्थिताइवोत्तस्थुर्नद्विचित्रंमहेश्व-
रे॥२३॥यत्कृपेक्षेनतन्नंविश्वंयस्यैवतनुतितस्यकिं॥आश्चर्यमेतन्नव-
दा॥इतिप्रोक्तंमयातव॥२४॥येछिन्नशीर्षदेवाश्चभग्नांगाश्चतथा
नृपा॥तेजीविताःसुरुद्रेणनदक्षश्छिन्नमस्तकः॥२५॥ततःसंप्रार्थ-
यामासशिवंब्रह्माकृपाद्दृधीः॥भगवन्जीवयैतंचदक्षंमुनिगणा
धमं॥२६॥इतिश्रुत्वाब्रह्मवाक्यंवीरभद्रंशिवोवदत्॥वीरभद्रान
यक्षिप्रंदक्षशीर्षंविमृग्यहि॥२७॥एवमाज्ञापितस्तेनवीरभद्रोगयो

श्वरः॥प्रार्थयामासतंदेवंवृषवाहनमादरात्॥२८॥वीरभद्रउवाच॥
को॰म॰ देवक्षमस्वमत्यंत्वंदग्धंदक्षस्यमस्तकं॥मयाक्रोधाभिभूतेनकिमा-
१९ ज्ञापयसेवद॥२९॥इतिश्रुत्वावीरभद्रवचनंवृषभध्वजः॥प्रोवाच
त्वंवरस्तमुखमानयस्वेतिसोनयत्॥३०॥कायेसंयोजितंतच्चदक्षस्या
लोकनात्तदा॥शिवस्यसुप्तइवसमुत्तस्थौब्रह्मसंभवः॥३१॥शिवमा
लोक्यपुरतोब्रह्मविष्णुसमन्वितं॥ह्रीतोनोवाचकिंचित्सप्रणामक
रोत्तदा॥३२॥ततोब्रह्माब्रह्माब्रवीदुद्रंप्रार्थयन्विष्णुनासह॥यज्ञांतेतव
भागोस्तुसर्वविघ्नुरनाथप॥पोष्यास्तवेमेसर्वेपिदेवाःशक्रादयोमताः
अतःसर्वेषुतुष्टेषुयुक्तोभावस्तवप्रभो॥३४॥इतिसंप्रार्थ्यरुद्रंसद
क्षायज्ञापयद्विधिः॥ऋत्विग्भिःसहितःसर्वैःसमापय्यविधिंक्रतोः॥३५ १९
मापुत्रकैवंपुनरेवकुर्याईशापत्तापंयदिकाम्यतेत्वया॥हितंतदाकर्ण्य
पितुर्वचस्तदोरीकृत्यदक्षोथसमापयत्क्रतुं॥इतिश्रीब्र॰पु॰उ॰क॰को॰द-

शमोध्यायः॥१०॥ ॥श्रीकपिलउवाच॥ ॥अथदक्षश्चमुनिभिर्वसि
ष्ठादिभिरादरात्॥देवानतोपयद्भागैःस्वैःस्वैःशक्रादिकान्नृप॥१॥अंते
ददौसरुद्रायभागंदक्षःप्रसन्नधीः॥मृतांसुतांचिंतयन्वैस्वापराधेनखि
न्नधीः॥२॥एवंसर्वेषुतुष्टेषुदेवेष्वथवृषध्वजः॥चिंतयामासमनसीकि
मिदंकृतइत्यपि॥३॥दुर्यशोमहियिसंचिंत्यनिश्चिकायचततःखिदं॥ना
गमिष्यद्यदिसतीनाभविष्यदपिह्यदः॥४॥ततोपराधःसत्यैषकृतोदं
ड्यासतीमया॥इतिनिश्चित्यमनसिसत्यैशापंददौहरः॥गमनायनि
षिद्धापियानादृत्यवचोमम॥आगत्ययज्ञसदनंजहौकुंडेनिजंवपुः॥६
विघ्नैकलयतीयज्ञेसतिसाकोकिलाभवेत्॥ययापकीर्तिरिध्यस्ता
मर्यायंदंडमर्हति॥७॥एवंसत्येविभुश्चैवसुशापंदत्वाहरस्तदा॥सर्वा
नाहपुनर्देवानाहूयनृपसत्तम॥८॥देवाश्चमुनयश्चैवयूयंशृणुतम
द्वचः॥सर्वेषांहितकामार्थंभुवनोगतमत्सर॥९॥यज्ञेधर्मेतथाती-

थेपुराणेसद्दृतेतथा ॥ विघ्नंकुर्वंतीयेपापाःस्तेतिर्यंचोभवंतिहि ॥१०
यथासतीमत्प्रियापिकोकिलात्वंभजिष्यति ॥ यज्ञविघ्नकरीतद्द
दन्येस्युःकोत्रसंशयः ॥११॥ इतिश्रुत्वामहेशस्यसत्याःशापंसुदा
रुणं ॥ हाहाकृत्वासुराःसर्वेप्रार्थयामासुरीश्वरं ॥१२॥ देवाऊचुः
भगवन्करुणासिंधोदीननाथदयाघन ॥ सत्याःशापस्त्वयादत्तो
माभूत्सर्ववरप्रद ॥१३॥ सतीयंनापराध्नोतिदक्षस्यैवानयो
त्ययं ॥ तस्मान्निवर्तयहरशापंसत्याःसुदारुणं ॥१४॥ श्रीकपिल
उवाच ॥ श्रुत्वेतिप्रार्थनावाक्यंदेवानूचेहसन्निव ॥ योयथाकुरु
तेकर्मप्राप्नोतिसफलंतथा ॥१५॥ नवैषम्यंमयिसुराःकल्पद्रुम
निभेकचित ॥ तस्मात्स्वकर्मवशगःसुखदुःखेसमश्नुते ॥१६॥ तथापि
यदियूयंमांनिर्बंधिंकुरुथामराः ॥ शापापहारेतदियंयदामोक्ष्यति
तद्ब्रुवे ॥१७॥ संवत्सरसहस्त्रांहिदिव्यंभूत्वापिकीनगः ॥ सतीशा

पांतमासाद्यभविष्यतिहिमाचलात् ॥१८॥ मेनायांतत्रतत्वेयंतपः
परमदारुणं ॥ मांप्राप्स्यतिनसंदेहःसत्यंमेव्याहृतंसुराः ॥१९॥ ताव
त्सर्यंतमेकाकिकैलासस्थोवसाम्यहं ॥ अन्यमेकंवरंदद्येसत्यैदा न २४
स्येभिमतोषितः ॥२०॥ सतीजातांकोकिलांयेपूजयिष्यंतिमानवाः ॥
याश्चस्त्रियोविशेषेणतास्युःपूर्णमनोरथाः ॥२१॥ कलौजनिष्यमाणा
नांजनानांतारणायहि ॥ धसासतीमयादेवारहस्यंकथितंहिवः ॥२२
॥ कोकिलाव्रततुल्यंतुव्रतंनैवचनैवच ॥ स्त्रीणांहितकरंदेवाःकिम
न्यैव्रतकोटिभिः ॥ श्रीकपिलउवाच ॥ इत्युक्तास्तेतदादेवाशिवेन
परमात्मना ॥ प्रसन्नचित्ताःसर्वेपिययुःस्वंस्वंनिकेतनं ॥२४॥ भगवा
नपिकैलासंस्वगणैःसहपार्थिव ॥ ययौनातिप्रीतमनाःसतीनाशन
तस्ततः ॥२५॥ दक्षोपिसंस्मृत्यसतींशोचंस्त्वाघमनुस्मरन् ॥ दुःख
वस्तमुखोभूत्वानिनायकतिचित्समाः ॥२६॥ ततःकालेकतिपयेग

तेथविधिसंभवः॥ देहंमुमोचयोगाग्निदग्धंदक्षःप्रजापतिः॥ २७॥
मनोर्वंशेसंप्रसूतःप्रचेतोभ्यांमहीपते॥ सत्वंशिवद्वेषकरःपूर्वदुः
खेनजीवसि॥ २८॥ अपुत्रयापरित्यक्तःसत्याप्राणाःपुरा ततः॥ न
पुत्रसुखलाभस्तेजातोराजन्नसंशयः॥ २९॥ येनयत्क्रियतेक
र्मपूर्वजन्मनिपार्थिव॥ तत्फलंभुज्यतेतेनजनेनान्येननैवच॥ ३०॥
नाभुक्तंक्षयमाप्नोतिकर्मकोटिशतैरपि॥ गतेःकल्पेस्ततःपुंसा
कर्तव्यंसुविचार्यहि॥ ३१॥ इदंरहस्यंतवदुःखकारणंजन्मार्जितं
प्रोक्तमशेषतोमया॥ किंश्रोतुमिच्छातवपार्थिवात्मज त्वंपृच्छस
र्वंकथयामितत्वतः॥ ३२॥ इतिश्रीब्रह्मांडपु०को०माहात्म्येए
कादशोध्यायः॥ ११॥ ईश्वरउवाच॥ यत्पृष्टंभवताब्रह्मन्दक्षाख्यानं
हिनारद॥ तत्सर्वंकथितंतुभ्यंरहस्यमपिवैमया॥ १॥ एवंफला
न्यवाप्यंतेवैषम्यरहितादपि॥ मत्तःकल्पद्रुसदृशाद्विविधानिन
रैःसदा॥ २॥ तस्मान्नममवैषम्यंमुनेनिश्चयमाप्नुहि॥ संदेहंसंप
रित्यज्यस्वस्थोभवमहामते॥ ३॥ आत्मारामस्यवैषम्येकारणंनैव
मेकचित्॥ तथापिमूढामयितत्कल्पयंतिनरामुने॥ ४॥ इतिसर्वं
मयोक्तंतेयत्पृष्टंभवताहिमां॥ किमन्यच्छ्रोतुमिच्छातेतत्पृच्छस्वा
विशंकितः॥ ५॥ सूतउवाच॥ इतिश्रुत्वामहेशस्यवाक्यंदेवर्षिसत्त
मः॥ नारदःपरिपप्रच्छपुनर्देवंपिनाकिनं॥ ६॥ नारदउवाच॥ संछि
न्नःसंशयोदेवमयाज्ञानविकल्पितः॥ प्रियाप्रियादिवैषम्यंप्रक
ल्प्यमित्त्वयिवर्धितः॥ ७॥ क्रियातिनिपुणोदक्षोयज्ञकर्ताप्रजाप
तिः॥ ऋषयोऋत्विजोयस्यसदस्यादेवतागणाः॥ ८॥ क्रतुव्युष्टि
विधानायोद्भूराद्भुगःकर्तारयं॥ तस्मात्वछ्रद्धयाहीनंनतत्फलंकिं
हिचित॥ ९॥ नैतावतात्वयिविभोवैषम्यंयुज्यतेपरे॥ योयथाभावये
त्त्वांत्वंतान्भावयसेतथा॥ १०॥ अद्भुतंमहदाख्यानंदक्षाश्रयमिदं

विभो॥ श्रुत्वात्वत्तोप्यमीदेवाःशश्रूषंतिपुनर्हर॥११॥सतुप्राचेतसो
दक्षकपिलंयज्ञगादह॥ प्राग्जन्मसंचितंकर्मश्रुत्वाकिंकृतवान्वद॥१२
कथंवातस्यतद्दुःखमानपत्यत्वसंभृतं॥ क्षीणंवाकांगतिंदक्षोगतोरा
जावदस्वतत्॥१३॥ सतीशापंसमापन्नाकोकिलारूपधारिणी॥जाते
तिकथितंतस्याव्रतंचाघहरंहर॥१४॥तद्व्रतंकथ्यतांदेवसर्वेशश्रूष
वःसुराः॥ कथंवात्वांसमापन्नासतीशैलसुतापुनः॥१५॥एतद्विस्तर
तःसर्वंकिथयस्वमहेश्वर॥अनुग्राह्यायदिवयंसर्वेपिभवतोमताः॥१६
॥सूतउवाच॥ इतिदेवर्षिणापृष्टोनारदेनेश्वरस्तदा॥जगादनारदंप्री
त्यासत्कुवन्नर्वमादितः॥१७॥ईश्वरउवाच॥श्रृणुनारदसर्वंतेकथयि
ष्येमलापहं॥कोकिलायाव्रतंपुण्यंप्राचेतसकृतंमहत्॥१८॥कपि
लोक्तंनिशम्याथदक्षःप्राचेतसोमुने॥ प्रार्थयामास कपिलंदुःखनि 
स्तारणायहि॥१९॥दक्षउवाच॥भगवन्केनविधिनामुक्तस्यांपूर्व

प्रातकान्मुने॥ अनपत्यत्वदुःखाच्चसनेमेकथयप्रभो॥२०॥प्राक्कर्म
त्वन्मुखाछ्रुत्वाकिंचिदाश्वासितोमुने॥येनज्ञातंपूर्वकर्मसितस्मात्तो
च्चयेदिति॥२१॥श्रीकपिलउवाच॥श्रृणुराजन्व्रतंदिव्यंसर्वपापापहं
परं॥येनानुष्ठितमात्रेणमनुजःसुखमाप्नुयात्॥२२॥जातासतीको
किलेतिकथितंतवसुव्रत॥तस्याव्रतंकुरुष्वत्वंकल्याणंवांछसेयदि
दि॥२३॥अंबिकाराधितायेनशिवपत्नीनरर्षभ॥नतस्यदुर्लभंलोके
परत्रेचसहंभवेत्॥२४॥तस्मात्तस्याव्रतंतुभ्यंकथयिष्येसुखावहं॥
सविधानंनरश्रेष्ठश्रृणुष्वैकाग्रमानसः॥२५॥अधिमासोयदैषा 
ढोभवेत्तुपृथिवीपते॥तदाधिमासेनिक्रांतेशुद्धाषाढ्युपस्थि
ते॥२६॥पौर्णमास्यांव्रतंतत्तुसायंसंकल्पयेच्छुचिः॥सायाह्न्व्या
पिनीग्राह्याचास्मिन्पूर्णिमान्नृप॥२७॥मासमेकंकरिष्येहंको
किलाव्रतमुत्तमं॥प्रातःस्नास्याम्यभोक्ष्यामिनक्तंरक्षस्वमांसदा॥२८

को०म०
२३

इतिसंकल्प्यपूर्वेद्युःश्वोभूतेप्रतिपद्दिने। ब्राह्मणानुज्ञयास्नायाद
वक्रिसूर्योदियान्नृप॥२९॥ उषःकालेसमुत्थायस्मृत्वादेवान्नथामु
नीन्॥ भूमिंसंप्रार्थ्यचितनोदेहशुद्धिंविधायच॥३०॥ नद्यांतडागे
कूपेवागत्वातीर्थंसमर्थयेत्॥ संकल्प्यचततस्नायात्ब्राह्मणानुज्ञ
यान्नृप॥३१॥ आदौदिनाष्टकंस्नायात्तिलामलकचूर्णकैः॥ ततोदि
नाष्टकंचूर्णैःकिंचोरवचयोःशुभैः॥३२॥ दिनाष्टकंततःश्चूर्णैर्मुरला
कमलकंदयोः॥ दिनाष्टकंततःसर्वैर्मिलितैःस्नानमाचरेत्॥३३॥
विलिप्यांगानिप्रथमंमंत्रेणानेनसुव्रत॥ ततस्नायादितीराजन्सर्व्वपु
ष्प्यासयेन्नरः॥३४॥ औषध्यःपापशमनाःपवित्राःरोगनाशनाः॥ ता
विलिप्तामयांगेषुपापघ्नंतुममाखिलं॥३५॥ एवंस्नात्वाततोर्घ्या
णिदद्याद्भेभक्तिमान्नरः॥ गंधाक्षतफलैर्युक्तान्यादित्यादिभ्यएव २३
च॥३६॥ भोसूर्यविश्वचक्षुस्त्वंस्नानस्यममसम्मते॥ गृहाणार्घ्य

मिदंदत्तंपापंहरनमोस्तुते॥३७॥ कोकिलेमंत्ररूपेत्वंप्रियारुद्रस्य
सुस्तरे॥ गृहाणार्घ्यंमयादत्तंपापंहरनमोस्तुते॥३८॥
॥ गृहाणार्घ्यंमयादत्तंपापंहरनमो
स्तुते॥३९॥ ततआगत्यतीरेतुवाससीपरिधायच॥ पूजयेत्कोकि
लांदेवींविविधैरुपचारकैः॥४०॥ नानाविधैराभरणैस्तथोत्तमैर्वस्त्रैः
फलैश्चैवतथातिशोभनैः॥ पुष्पैस्तथाधूपवरैःसुदीपैःसंपूजयेद
क्षसुतांहिकोकिलां॥४१॥ इतिश्रीब्रह्मांडपु०उ०कल्पेकोकि०स्ये
कादशोध्यायः॥११॥ ॥श्रीकपिलउवाच॥ ॥विधानंशृणुराजेंद्रपू
जनस्यवदामिते॥ येनपुरादाकोकिलास्यात्प्रसन्नादक्षकन्यका॥१॥
प्रतिमांकारयेदादौकोकिलायानृपोत्तम॥ सौवर्णीमथवारौप्य
मयींताम्रींचमृन्मयीं॥२॥ शक्त्याथवापिष्टमयींप्रतिमांकारयेद्बु
धः॥ आम्रवृक्षस्थितांकृत्वाकोकिलांपूजयेत्सदा॥३॥ शस्त्रैर्गं

धैस्तथापुष्पै धूपैश्चैव सुशोभनैः॥ नैवेद्यैर्विविधैश्चैव फलैःशस्तां
कुरैस्तथा॥४॥ वस्त्रैर्विचित्रकर्पैश्च कृष्णवर्णैर्विशेषतः॥ वज्रादि
निर्मितैर्नेपथ्यैर्मकिसनजैस्तथा॥५॥ रौप्यपादांशौक्तिकाक्षीं विद्रु
मनेत्रादिकां तथा॥ पंचरत्नां पृष्ठभागे प्रतिमां पूजयेद्बुधः॥६॥ रौप्या
म्रवृक्षसंस्थां च शक्तौ कृत्वा नृपोत्तम॥ अशक्तोपि स्वशक्त्या तांमृ
न्मयीमपि पूजयेत्॥७॥ पूजोक्तान् शृणु राजेंद्र मंत्रानेतान्समासतः
कथयामि सती येश्च पूजिता वरदा भवेत्॥८॥ ध्यायामि सर्वार्थ
फलप्रदां तां दक्षापमानात्सपिकीतनुं परां॥ आविष्कृतां शान्तरुचिं
स्वदेहत्यागेन चित्ते प्रणमेच्च कोकिलां॥९॥ यायोगिभिर्योगिवि
शुद्धबुद्धिभिर्भर्याब्धितौ रैकतमिस्वरूपा॥ विश्वस्वरूपेण विचिं
त्यते मले चित्ते सदा तां प्रणमामि कोकिलां॥१०॥ आवाहयामि देवे २५
शशिवपत्नीं सनातनीं॥ सृष्ट्यादिकर्त्रीं सिंहर्त्रीं धर्मविद्वेषिणां स

दा॥११॥ सर्वाधारस्वरूपा त्वं देवि भक्त्या समर्पिते॥ आसने स्मिन्स्थिता
मातर्भक्तकामान्प्रपूरय॥१२॥ त्वत्प्रसादरजसा पूतं विश्वं सर्वं तथापि मे॥ अ
र्घ्यरूपया हृविपाद्यसंप्रतिगृह्यतां॥१३॥ त्रैलोक्याघौघविध्वंसदक्षे दक्ष
सुते मले॥ कोकिले र्घ्यं गृहाणेदं कृपया मयि भामिनि॥१४॥ स्मृतापि जगतां
तापं पापं च हरसि तत्क्षणात्॥ यासा शुद्धा कोकिला स्व्यागृहाणाचमनीयकं॥१५
अपां रूपेण या विश्वं प्राणिति प्रणयान्विता॥ स्नानार्थमुदकं दत्तमुरीकुरु मातु
सर्वदा॥१६॥ माधुर्यरूपा सततमाप्याययसि या जगत्॥ देवि पंचामृतस्नान
मंगीकुरु दयान्विता॥१७॥ शुद्धस्वरूपा या देवि पवित्रमसि वै जगत्॥ शुद्धो
दकस्नानमिदमंगीकुरु दयान्विता॥१८॥ ययावृत्तमिदं विश्वं स्वरूपेण गु
णात्मना॥ सा त्वं देवि गृहाणेदं वासो वस्त्रं दत्तं मयाल्पकं॥१९॥ उपवस्त्रमि
दं देवि गृहाण करुणान्विता॥ कोकिले कलकंठे त्वं जगद्धितविधायिनी॥२०
निर्लेपाया अपि तस्त्वं चंदनं लेपयाम्यहं॥ तुष्टा भव भवानित्यमनेन लेपने
नमे॥२१॥ अखंडसौभाग्ययुते दक्षकन्ये महेश्वरी॥ हरिद्राकुंकुमं चैव

को॰म॰ गृहाणकरुणायुता॥२२॥ पुष्पाणीमानि दिव्यानिजातीचंपकमल्लिकाः
२२ ॥सुगंधरूपेदेवित्वंगृहाण॥ मुद ॥२२ दायिनि।२३॥ वृक्षनिर्यासि
मानीतंसुगंधरूपमादरात्। मयानिवेदितंतुभ्यंगृहाणाति मुदान्विता॥२४
॥गव्यमाज्यमिदंदेवी सुवर्त्यासिंप्रयोजितं॥दीपंगृहाणांबिके त्वं त्रैलोक्या-
तिप्रकाशके॥ नैवेद्यं विविधैर्द्रव्यैर्निर्मितंषड्रसैर्युतं॥ नित्यतृप्तागृहाण
त्वंदेवीत्रिपुरसुंदरी॥२६॥पानीयमिदमानीतंत्वदर्थंकल्पितंमया॥ज
गत्तृष्णाहरेदेवीगृहाणाति दयान्विता॥२७॥उत्तरापोशनंदेविहस्तप्रक्षा
लनंतथा॥ मुखप्रक्षालनंदत्तंगृहाणेदंमहेश्वरी॥२८॥ करोद्वर्तनकं
देविचंदनंप्रतिगृह्यच॥प्रीताभव महामायेसर्वान्कामांश्चदेहिमे॥२९॥
तांबूलमेतद्दृढं घंजगदानंददायिनी॥ कर्पूरैलालवंगादियुक्तंजाति
फलेनच॥३०॥ गृहाण फलमेतत्ते दत्तंभक्त्यामयानघे॥ सर्वान्कामान्स २५
फलयत्वस्माकंमहेश्वरी॥३१॥ दक्षिणासिसदादेवी सतांसंरक्षणा

न

यहि॥ अतस्तुभ्यंमयादत्तांदक्षिणांत्वंसुखीकुरु॥ ३२॥ विश्वप्रकाशे
जगतांसुसेव्येब्रह्मादिदेवार्चितपादपद्मे॥ गृहाणदेवीनीराजनदीपमेनं
नमोममेदंहरत्वांहि॥ ३३॥ व्यापिकायाअपितुभ्यंप्रदक्षिणमाचरे॥
प्रसीदजगतांमातःकोपिकलेत्वांनमाम्यहं॥३४॥ नमोस्तुतेध्यानविदां
गतिप्रिके मारिसंक्षोभणहेतुभूते॥ त्रैलोक्यरक्षैकनिदानभूतेनमोन
मस्तेकरवाणिनित्यं॥३५॥ त्रैलोक्याराधितपदेदेविभक्तजनप्रिये॥
मंत्रपुष्पमिदंदत्तंगृहाणशिवसुंदरी॥३६॥ नंदनोद्भूतपुष्पौघपूजितेपरमे
श्वरी॥३६॥ यथात्वयानोविप्रयोगः शिवेनपरमात्मना॥ तथामयापिमद्भर्त्रा
माविप्रयोगोस्तुदक्षिणे॥ ३७॥ एवंसमाराध्यसतींपिकीतनुंसर्वान्समा
प्नोतिनरोरविलाथार्न्॥ स्त्रियोविशेषणसमाप्नुवंतिसौभाग्यपुत्रादिमनीप्सि
तार्थं॥३८॥ इतिश्रीब्रह्मांडपुराणेउपासनाकल्पेकोकिलामाहात्म्येत्रयो
दशोध्यायः॥१३॥ ॥श्रीकपिलउवाच॥ अतःपरंप्रवक्ष्यामिनाम्ना

मष्टोत्तरंशतं ॥कोकिलायाःसमग्राघहरंसर्वार्थकामदं॥१॥नाम्ना
मष्टोत्तरशतस्यास्यप्रोक्तोमुनिःशिवः॥कोकिलादेवताप्रोक्ताछंदोनु
ष्टुप्प्रकीर्तितं॥२॥इष्टसिद्ध्यर्थमस्योक्तोविनियोगोमहामते॥एतेनस
द्दशंनान्यस्तोत्रमस्तीभविष्यति॥३॥कोकिलाकलकंठाचदक्षकन्या
महासति॥त्रैलोक्यानंददात्रीचजगत्कर्त्रीपतिव्रता॥४॥देवारा
धितपादाब्जाभक्तरक्षैकतत्परा॥शिवैकनिष्ठाशिवदाभवानीभ
क्तवत्सला॥५॥भक्तचिंतामणिःश्रीश्चनिजभूतिविभूषिता॥उमो
पासकर्चिताचसर्वाघौघविनाशिनी॥६॥श्रीमतीगुणसंपन्नाविद्या
विद्यावतांप्रिया॥विद्यागम्याचधन्याचधनधान्यविवर्धिनी॥७॥
धात्रीधामाच्यधीराचधर्मगम्याधनापहा॥कल्पाकल्पविधानेष्टाक
लिहंत्रीकविस्वदा॥कर्मभूमिःकेशिनीचकेशिहंत्री~~[illegible]~~सुरेष्ट
दा॥चामुंडाचंडहंत्रीचमुंडदैत्यविनाशिनी॥९॥निशुंभशुंभहंत्री

चरक्तबीजविनाशिनी॥रक्तप्रियापानरतामदांधामदभंगिनी॥१०
॥मदिरामत्तगमनामातंगीमहिषार्दिनी॥अंधकारिप्रियाप्रीतादैत्य
दानवमर्दिनी॥११॥दैत्याराधितपादाब्जादीनबंधुनाथादयापरा॥दांता
दानवरादामादामबधाधुरंधरा॥१२॥धीमतिधर्मजननीधर्मरूपा
धनप्रिया॥आधाररूपानिखिलानिखिलेष्टार्थदायिनी॥१३॥दं-
डिनीचापिनीबाणाखड्गिनीपरियायुधा॥पवित्रापावनीपूतफ-
लदेष्टफलप्रदा॥१४॥सारासाररतासाररूपासारायुवासरीत॥स
भ्रितिःसंगररतासागरांबरधारिणी॥१५॥शोभनाशुभदासामगम्या
थर्वणविद्गतिः॥ऋग्वेदगम्याचयजुर्विद्याशास्त्रस्वरूपिणी॥१६॥
साध्यासाधनगम्याचसरचूःसामगायिनी॥सीताशांतस्वरूपाच
सत्यासर्वगतासमा॥१७॥सीमासीमंतिनीशंकाशंकागम्याचसर्व
दा॥इतिनाम्नामष्टशतंकोकिलायानिरूपितं॥१८॥यएतत्संस्मरे

को॰म॰ प्रातःसायंच सुसमाहितः॥ सदेव्याःप्रीतिभागीस्यादिहामुत्रसुखीन
२७ रः॥१९॥ एवंएतैर्नामभिर्मर्त्योदेवींसंपूजयेन्नृप॥ बिल्वपत्रैस्तथापुष्पैस्तु
लसीपत्रकैस्तथा॥२०॥ ससर्वान्समवाप्नोतिकामान्मर्त्योनसंशयः॥अ
पिपापसमाचारःसदाचारोभवेन्नृप॥२१॥ आमयान्मुच्यतेरोगीह्यपुत्रः
पुत्रवान्भवेत्॥ स्त्रीचेत्पठतिसौभाग्यंप्राप्नुयात्पृथिवीपते॥२२॥ एवं
संपूज्यगिरिशांसंस्तुवीतस्तवैरिमैः॥ कोकिलायाःप्रसादार्थंनिरोविद्या
दिकामुकः॥२३॥ यथायुवांलोककांचिदेवसंगमाभावंसमागच्छतएवमेव
॥आवांकदाचित्कचिदेवदेविवियोगदुःखान्भजंभजावः॥२४॥ कोकि
लेकुलरक्षेत्वंकुरुकल्याणमिष्टदे॥ कुबुद्धिंचकुशीलंचकुरूपंचानि
वारय॥२५॥ यद्यत्स्त्रीवाचकंदेवितत्वंभजसिकोकिले॥ पुरुषाख्यं
भवेद्यच्चतत्सर्वंपरमेश्वरः॥२६॥ यथायुवामेवविभूजगतःकारणं
परं॥ तेनसत्येनमेदेविपूर्णाःसंतुमनोरथाः॥२७॥ देविविद्याःस्वरूपेण

जगद्व्याप्तंत्वयाखिलं॥ तेनसत्येनसर्वेपिप्राप्नुयांतुममाशयः॥२८॥
यथात्वंसर्वजगतांमाधारोसिसनातने॥ तथाममाखिलंपापंप्रणाशमा
यातुसर्वशः॥ तवासाध्यंकिमस्तीहब्रह्मांडेशिवसुंदरि॥ तस्मान्मुखा
लनेकस्तेप्रयासोवदकोकिले॥३०॥ इतिस्तुत्वांकोकिलांप्रत्यहंयः
संपूज्येष्टंप्राप्नुयात्सर्वमेव॥ किंवासाध्यंकोकिलाचेत्प्रसन्नाभार्यारु
द्रस्यप्रियादैवतंच॥३१॥ इतिश्रीब्रह्मांडपुराणेउपासनाकल्पेकोकि
लामाहात्म्येचतुर्दशोध्यायः॥१४॥ ॥श्रीकपिलउवाच॥ ॥शृणुष्वा
वहितोराजन्नियमंकोकिलाव्रते॥ उद्यापनविधिंचैवयेनसांगंव्रतंभ
वेत्॥१॥ नक्तंभुंजीतसततंभूमिशायीभवेन्नरः॥ पलांडुंलशुनंचैव
वृंताकंनैवभक्षयेत्॥२॥ माषांश्चैवमसूरांश्चकोद्रवान्निःसदास्तथा
॥भावदुष्टान्शब्ददुष्टान्वर्जयेत्सततंनरः॥३॥ रात्रेश्चतुर्थयामेतुस्थात
को॰म॰ व्यंप्रातर्निभिन्नृप॥ भूमिंसंप्राप्यदेवादीन्स्मृत्वादेवादिकंव्रजेत्॥४॥ तीर्थ

दिदेवान्संप्रार्थ्य पूर्वोक्तविधिनाचरेत् ।स्नानंततःसमागत्य पूर्ववत्पूज
नंचरेत् ॥५॥नानृतंहिवदेत्किंचिद्दुर्जनैःसहनोवदेत् ।नशपेत्कंचनजनं
नात्यायासंसमाचरेत् ॥६॥नचोपवासंकुर्वीतकस्यचिन्नोप्रतिग्रहं ॥कु
र्वतिनोविरुध्येतकेनचित्सहपार्थिव ॥७॥व्रतिभिःसहसंवासंकुर्वीत
सततंव्रती ।यत्तस्तेषांसंगमेनसंशयातात्भवंतिही ॥८॥इतिहासंस
माकर्ण्यकोकिलायानृपोत्तम ॥तथैवपतिशुश्रूषापरयापतिदेव
या ॥९॥ स्त्रियाभाव्यंनृपश्रेष्ठपुरुषेणापिसुव्रत ॥स्वस्त्रीप्रीतिमता २८
भाव्यंयतःप्रीत्यातयोर्भवेत् ॥१०॥ धर्मार्थश्च तथाकामस्तस्मात्प्री
तिर्हृद्यामता ॥११॥ प्रातिकूल्येतयोर्नैवधर्मादीनांफलंनृप ॥एवंमास
व्रतंकृत्वाततउद्यापनंचरेत् ॥१२॥ विप्रानाहूयचतुरोह्यावेकंवा निजंगु
रुं ॥अधिवासनिकंकर्मरात्रौकुर्यात्प्रसन्नधीः ॥१३॥मंडलंकारये
द्दिव्यंश्चित्रवर्णैःसुरंगकैः ॥रक्तैःपीतैस्तथाकृष्णैःशुभ्रैर्नीलैर्नृपो





त्तम ॥१४॥ तस्मिंश्चलिंगतोभद्रमंडलेस्थापयेद्व्रती ॥ब्रह्मादिदेवताः
सर्वाआनुपूर्व्येणपूजयेत् ॥१५॥मध्येसंस्थाप्य कलशंमच्छिद्रमथ
तत्रच ।पूर्णपात्रंनिधायास्मिन्कोकिलांपूजयेन्नृप ॥१६॥ विविधैःकुसु
मैर्गंधैर्वस्त्रैराभरणैस्तथा ।कृष्णावर्णैर्विशेषेणवित्तशाठ्यविवर्जि
तः ॥१७॥ यद्यत्स्वेष्टंभवेत्तत्तत्कोकिलायैसमर्पयेत् ॥तेनैवतुष्यतिस
तिकोकिलानविभूतिभिः ॥१८॥ रात्रौजागरणंकुर्याद्गीतैर्नृत्यैःसुवा
द्यकैः ॥पुराणश्रवणैश्चैवकालंसफलयेद्व्रती ॥१९॥ ततःप्रभातसम
येपूर्ववत्स्नानमाचरेत् ॥ब्राह्मणैःकारयेत्सर्वंस्थंडिलादिविधिंनृप ॥२०
अग्निस्थापनमारभ्यसर्वकर्माचरेद्गुरुः ॥ततोब्रह्मादिदेवांश्चजुहुया
त्तिलपायसैः ॥समिद्भि
स्तिलपायसैः ॥२१॥ तत्तन्मंत्रैस्ततोदेवींजुहुयात्तिलपायसैः ॥समिद्भि
रपिगोरामिमायेतिमनुनासुधीः ॥२२ ॥अष्टोत्तरशतंचैवाहिचतुर्दश
एववा ॥ततःप्रायश्चित्तहोमंसमाप्याथाग्निपूजनं ॥२३॥ कृत्वाततःस

कोम्॰ वत्सांगांमाचार्यायनिवेदयेत् ॥ वस्त्रैराभरणैश्चैव गुरुंसंपूजयेन्नृप ॥२४
२९ अन्येभ्यश्चापिविप्रेभ्योभूयसीदक्षिणांदिशेत् ॥ भोजयेत्तान्गुणवतास
दन्नेननृपोत्तम ॥ दंपतीभोजयेच्छक्त्याचतुरःपंचवाव्रति ॥ एकंवावाय
नंदद्याद्वस्त्राभरणसंयुतं ॥२६॥ शक्तिश्चेत्प्रत्यहंपूज्यादंपतीपार्थि
वोत्तम ॥ अशक्तश्चेदेकमपियुग्मंसंपूजयेन्नृप ॥२७॥ दीनांधकृप ३०
णेभ्यश्चभोजयेच्छक्तिमान्नरः ॥ एवंसर्वेषुतुष्टेषुमानितेष्वृत्विगादिषु ॥२८
॥ तदाशिषंसमादाय भुंजीतसहबंधुभिः ॥ भावयन्मनसाराजन्देवी
मेप्रीयतामिति ॥ २९ ॥ तद्दिने कोकिलाशब्दंशृणुयाद्यदिलभ्यते ॥
प्रत्यहंवानृपश्रेष्ठ वनंचेन्निकटंभवेत् ॥३०॥ कोकिलायाःस्वरोरूपं
पातिव्रत्यंस्त्रियास्तथा ॥ कुरूपाणांतथाविद्यारूपंभवतिपार्थिव ॥३१
॥ मासंकर्तुंनशक्तायाकोकिलाख्यंव्रतंसदा ॥ तयापंचाहमपिवैकर्तव्यं
त्र्यहमेवच ॥३२॥ एकाहमपिकर्तव्यंस्नानंवापूजयेन्नृप ॥ अशक्ताचे
नं

३०
त्कोकिलायाःप्रतिमांगुरवेदिशेत् ॥ ३३ ॥ तत्कर्तुमप्यशक्ताचेच्छृणु
यात्कोकिलाकथां ॥ तावतैवव्रतफलंतस्याअपिभवेन्नृप ॥३४॥ इदं
स्त्रीभिर्विशेषेणकर्तव्यंव्रतमादरात् ॥ तासांनित्यमिदंभाग्यंव्रतंकाम्यंत
थान्यणां ॥३५॥ आषाढेमलमासेतुसंप्राप्तेव्रतसमाचरेत् ॥ यास्त्रीव्रतंभ
वेत्सानुविधवासप्तजन्मसु ॥३६॥ सधवाविधवावापिव्रतमेतत्समाच
रेत् ॥ यास्त्रीसासर्वरूपेणविमानेनदिवंव्रजेत् ॥३७॥ यापत्न्यासहरा
जेंद्रव्रतमेतत्समाचरेत् ॥ साप्राप्नुयाद्धनंधान्यंपुत्रान्पौत्रान्यशस्त
था ॥३८॥ इहभुक्त्वाखिलान्भोगान्भूमौसंस्थाप्यवैयशः ॥ भ्राजिष्णु
नाविमानेनपत्न्यासहदिवंव्रजेत् ॥ ३९ ॥ पुरुषैरपिकर्तव्यंसकामैर्म
नुजाधिप ॥ व्रतमेतन्मुनिगणैर्व्रतराजोनिगद्यते ॥४०॥ एकवारंद्विवा-
रंवात्रिवारंवानृपोत्तम ॥ अनुष्ठितंव्रतंयेनससर्वफलभाङ्नरः ॥४१॥
३०
५.॥ ॥ तस्मादाचरपार्थिवोत्तमपरेशक्त्याव्रतंत्वंयदिप्राप्तुंवांछसिपारमस्य

को॰म॰ परमंसंसारयाद्दःपतेः॥यद्दुःखंतवमानसंसुनभवंतच्चाप्यवनेनैवते।।स
30 वंनिःस्यनिलप्स्यतेचजनुजं धुर्यंवरेण्यंगुणैः॥४२॥ इतिश्रीब्रह्मांडपुराणे
उपासनाकल्पे को॰म॰ पंचदशोध्यायः॥१५॥ ॥ईश्वरउवाच॥ ॥एव
माज्ञापितोब्रह्मन्कपिलेननृपोत्तमः॥श्रियास्वपत्न्यासहव्रतंचक्रे
विशुद्धधीः॥१॥यथोक्तंतेनमुनिनाकपिलेनविपश्चिता।पुरोहितं
तमेवासौकुलवान्कपिलंमुनिं।२॥नानाविधैश्चोपचारैरनर्घ्यैःपार्थिवो
त्तमैः॥पूजयामासपरयाभक्त्यापरभृतींसतीं।३॥एवंव्रतंविधायाऽ
थकपिलंसमपूजयत्।ब्राह्मणांश्चमहाभागानन्नाद्यैःसमतोषयत्॥४
एवंकालेबहुतिथेगतेथमुनिसत्तमः॥श्रीदेवीदक्षराजस्यस्त्रीगर्भंस
मधारयत्॥५॥गर्भःसततस्याववृधेनित्यंशुक्लइवोडुपः॥अजनयत्सुपु
तांमोदंपौराणांमुनिसत्तम।६॥नवमेमास्यतिक्रांतेसमस्तेश्वरसुवे
सुतं।कोकिलायाःप्रसादेनसर्वलक्षणलक्षितं।७॥ततोतिहृष्टोद 30

क्षःसन्कपिलानुमतेननत्वं॥पुत्रंसंस्कारयामासजातकर्मादिभिःशुभैः
॥८॥ददौदानानिविप्रेभ्योगवादीनिमहामनाः॥पुत्राभ्युदयकामार्थी
निप्रोक्तानिसूरिभिः॥९॥येयेसमागतागेहेतान्तान्कामैरतोषयत्।
कोकिलाधीनयेब्रह्मन्स्वालंकारधेनुभिः॥१०॥द्वादशेहनिपुत्रस्य
नामचक्रेसहर्षिभिः॥श्रीपइनिभूपालोददौदानान्यनेकशः॥११॥ततए
कादशेवर्षेकपिलानुमतेनसः॥पुत्रस्यचोपनयनंचक्रेशांते ततसोनृपः॥१२
॥गुरुभिःपाठितस्तस्यविद्यानानाविधामुने।सकलविद्यादितेनासौपुत्र
जग्राहेतांविशुद्धधीः॥१३॥चतुर्दशसुविद्यासुचतुःषष्टीकलासुच।
॥कोकिलायाःप्रसादेनबभूवनिपुणःसुतः॥१४॥धनुर्वेदेसबीजेच
बभूवनिपुणःसुतः॥ तंदृष्ट्वा…दक्षो…सुतंनंदा॥१५॥
30 ततःकालेगतिप्रयेगतेथपृथिवीपतिः॥दशार्णेनिजकन्यायाविवा
हार्थंसमुद्यतः॥१६॥वरंविचारयामासदक्षपुत्रंगुणैर्युतं॥पुरोहि

को॰म॰ तंसमाहूयततःप्रेषितवान्नृपः॥१७॥पुरोहितःसमागम्यदक्षंराजा
३१ नमब्रवीत्॥दशार्णोदिसुतेकन्यातवपुत्रायधीमते॥१८॥तांत्वमंगी
कुरुविभोस्नुषार्थंसतिशोभनां॥साधितस्यास्यसंबंधोनुरूपस्त्वविभा
तिमे॥१९॥पुरोधसेतिसंप्रोक्तोदक्षोंगीकृतवान्वचः॥विप्रान्समाहू
यमुदाचक्रेपुण्याहवाचनं॥२०॥ततःसैन्येनमहताचतुरंगेणपार्थिवः
॥सचयोभिमंत्रिसुतैःप्रेषयामासचैसुतं॥२१॥ततोराजादशार्णोपिव
रमालोक्यहृष्टधीः॥सर्वैरपूजयत्तंवैवस्त्रैराभरणैःशुभैः॥२२॥स्वगृ
ह्योक्तविधानेनविवाहंकृतवान्नृपः॥पारिबर्हमदाद्भूरिचतुरंगंबलंतथा
॥२३॥विप्रानमात्यसुतांश्चसर्वकामैरतोषयत्॥प्रस्थापयच्चतौप्रीतः
सैन्येनमहतावृतौ॥२४॥तामूर्मिलिराख्यांसंप्राप्य प्रतिपन्नप्रीतमानसः
॥स्वंपुरंससमासाद्यववंदेचरणौपितुः॥२५॥ततोदक्षोपिसंप्रीतः
स्नुषयासहितंसुतं॥दृष्ट्वाराज्ञीचसंप्रीताददावाशिषमादरात्॥२६



ततोदक्षोमुनिंप्रीतःकपिलंप्रोक्तवानिदं॥भगवन्ब्रूहिपुत्रायसखी
कायुक्तंहितत्॥२७॥ततोमुनिश्चकपिलःप्रतिपायव्रतंददौ॥सखी
अ॰ कायात्रिशुध्धायस्ववाक्यस्यानुगायच॥२८॥मर्तापोपितदाचक्रेको
किलायाव्रतंशुभं॥स्त्रियासहसुसंप्रीतोविविधैरुपचारकैः॥२९॥
ततःकतिपयाहस्यगतस्यमुनिसत्तम॥ऊर्मिलासुषुवेचाष्टौतनुस
त्तरंसुतान्॥३०॥पौत्रान्दृष्ट्वाथदक्षोपिकृतकृत्यातिशुध्धधीः॥
॥प्रतिपंस्थापयामाससुतंराज्येसहर्षिभिः॥३१॥अमात्यमंत्रिणांचै
तमधीनंविनिधायच॥कपिलेनसहप्रीतोवनमभ्यजगामह॥३२॥त
त्यपीययौतेनतपस्तुसुघनमहत्॥घोरव्यालमृगाकीर्णकामभो
गान्विहायहौ॥३३॥तावुभौदंपतीप्रीतौवसतौकपिलाश्रमे॥घोरं
तपस्तेपतुस्मकपिलस्योपदेशतः॥३४॥ततःशुध्धांतःकरणौविदि
३३ त्वाकपिलोमुनिः॥ददौज्ञानंहियत्सांख्यंप्रवदंतिमहर्षयः॥३५॥य
नात्मानंपरंशुध्धंनिर्लेपंगुणवर्जितं॥ज्ञात्वायातौपरांकाष्ठामद्यापि

भो॰ भ॰ ननिवर्तको ॥३६॥ कपिलोपि महायोगी तस्मिन्नेवाश्रमे निजे ॥ अवा
३२ सीद्योगमास्थाय सांख्याचार्यैः सुसत्कृतः ॥३७॥ एतत्ते सर्वमाख्यात
यत्पृष्टोहं त्वया मुने ॥ प्राचेतसस्य दक्षस्य चरितं पापहारकं ॥३८॥ अतः
परं कथयामि सर्वं सती यथा पर्वतराजपुत्री ॥ भूत्वा नमांश्चापि पापिकी
तनुं त्वां हित्वा शृणु धार्यवहितस्तदेतत् ॥३९॥ इतिश्रीब्रह्मांडपुराणे उपा
सनाकां॰ का॰ मा॰ षोडशोध्ययः ॥१६॥ ईश्वर उवाच ॥ ॥अथ सा को
किला देवी दिव्यवर्षसहस्रकं ॥ यातनाकालमासाद्य चिंतयामास चेत
॥१॥ कथं शिवेन संयोगं प्राप्स्यामि परमात्मना ॥ शिवादन्यं पतिं नाह
मनसापि वृणोमि च ॥२॥ इति संचिंत्य मनसि जन्यं तुहिनाचलात्
५५ ॥मनेकायां दक्षदेहात्तापशांतिचिकीर्षति ॥३॥ हिमाचलं परं भक्तं
ज्ञात्वा पत्युश्च भामिनी ॥ तां दृष्ट्वा कन्यकां जातां मुमुदे तुहिनाचलः ॥४॥
जातकर्मादिकान्सर्वान्संस्कारान्सोकरोद्गिरिः ॥ एवं कतिपये काले गते



थ मुनिसत्तम ॥५॥ विवाहयोग्यां तां दृष्ट्वा मनसा चिंतयद्गिरिः ॥ क
स्मै देया मया कन्या कोस्या योग्यः पतिर्भवेत् ॥६॥ इति चिंतयतस्तस्य
मित्रावरुणसंभवः ॥ आजगाम गृहं तं स संपूज्याथोपवेश्य च ॥७॥ प्रा
र्थनां कृतवानित्थं भगवन्मम कन्यका ॥ कस्मै देयेति संचिंत्य मनो मे ति
व्यथ्यति ॥८॥ पितुः कुलं भर्तृकुलं कुलं मातुः करोति या ॥ कुलत्रयसं
शयितं नास्ति कन्यासमो रिपुः ॥९॥ इति श्रुत्वा गिरेर्वाक्यमगस्त्यो मुनिसत्त
मः ॥ विचार्य मनसा प्राह तुहिनाचलमादरात् ॥१०॥ अगस्त्य उवाच ॥ वा
सुदेवसमो देवो न भूतो न भविष्यति ॥ तस्मात्तस्मै प्रदातव्या तुहिनाचल
कन्यका ॥११॥ इत्युक्त्वा स जगामाथ मित्रावरुणसंभवः ॥ तदा गिरेरपि प्रीतः
साहित्यं विदधेखिलं ॥१२॥ विवाहस्येति तच्छ्रुत्वा भवच्चिंतापरायणा ॥ उ
३३ मा हिमाचलसुता गत्वा रहसि चास्वपत् ॥१३॥ तां तथा स्वपतीं वीक्ष्य सखी
तस्याः समेत्य तां ॥ पप्रच्छ को दुःखहेतुस्तव नं माभयाम्यहं ॥१४॥ इति श्रु-

को॰म॰ त्वासखीवाक्यमुमीवाच भिजांसखीं ॥ शोचंतिकिं महंचाद्मिदुःखहेतुम
३२ मालितं ॥१५॥ शिवादन्यंपतिनाहंवृणेमनसानिश्चितं । अन्यथातत्कृतं
पित्रावासुदेवायदास्यति ॥१६॥ तस्मात्प्राणपरित्यागंकरोम्यालीतीनिश्चि
तं ॥ किंमेप्राणैर्वियुक्तेवद्विशिनास्तिफलंवद ॥१७॥ इत्युमायावचःसा
लीनिशम्योवाचतानदा ॥ एवंचेत्तर्हियास्यावोयत्रनोवेत्तितेपिता ॥१८ पि
॥ इतिवाक्यंवयस्यायानिशम्योमातयाययो ॥ गहनंघोरसिंहादिसंवृ
तंशिवकार्मुकी ॥१९॥ ततोहिमालयोपश्यन्कन्यकांभृशदुःखितः ॥ अ
न्वेषमाणोबभ्रामसमंतादुःखपीडितः ॥२०॥ कन्याद्वयंगतंयच्चतद्गत्वा
गहनंवनं ॥ नदीतीरंसमासाद्यास्थितंतत्रमहामुने ॥२१॥ तद्दिनेभाद्रशु
क्लस्य तृतीयाभूद्द्विजोत्तम ॥ तस्यामुमासखीसार्धिकालातिक्रमकार
णात् ॥२२॥ मत्शीनंयत्रलिंगंतेचक्रतुःकंन्यकेशुभां ॥ वल्वैर्नानाविधैः
पुष्पैःफलैश्चैवसुशोभनैः ॥२३॥ पूजांकृत्वाजागरणंनिशिचक्रतुराद
रात् ॥ निराहारेतदाविप्रोभूत्वाहृंसमुपागताः ॥२४॥ तद्व्रतंक्रियंत्रितोवांछां
तयोःसफलयन्मुने ॥ निर्जनेविपिनेतेमांदृष्ट्वाविस्मयमापतुः ॥२५॥
तदाब्रुवंमुमांदेविकिमर्थंक्लिश्यतत्वया ॥ कावामनोरथस्तेतिकथयस्व
ममायतः ॥२६॥ तदाब्रवीदुमाब्रह्मन्मनस्येवंविनिश्चितं ॥ शिवादन्यप
तिनाहंवृणोमीतितदन्यथा ॥२७॥ कर्तुंप्रवृत्तोमतातस्ततःप्राणान
पित्यजे ॥ इतिश्रुत्वावचस्तस्याअब्रादिषमुमामहं ॥२८॥ त्वयानक्लेशि
तव्यंवैलप्स्यसेस्वंमनोरथं ॥ इत्युक्त्वान्तंगतोद्रिंस्वंकैलासंमुनिस
त्तम ॥२९॥ ततःप्रभातसमयेस्नात्वातेकंन्यकेशुभे ॥ त्दृष्टेफलादि
संभक्ष्यपारणांचक्रतुर्व्रतं ॥३०॥ निशिजागरतःश्रांतेसुप्तेसत्तत्र न
दीतटे ॥ तदाहिमगिरिःकंन्यांमृगयंस्तत्रचागमत् ॥३१॥ दृष्ट्वाकां

न्येसरित्तीरेसुखेविह्वलमानसः॥ गत्वातंनिकटंमंदमुत्थाप्यपरिषस्व
जे॥३२॥उवाचकिमिदंकन्येत्वयाचरितमप्रियं॥ममदुःखकरंत्वंमेक
थयस्वाविशंकया॥३३॥इतिश्रुत्वापितुर्वाक्यमुमेवाचतदाखिलं॥
अभिप्रायंतन्निशम्यहिमागोवाक्यमब्रवीत्॥३४॥इतिचेत्त्वंहिरुद्रा
यदास्यामितांमनिंदिते॥उत्तिष्ठचलयास्यामोगृहमुक्तेतिसोनयत्
॥३५॥उमामानीयसदनंतदाःप्रेषितवान्विधिं॥मामानेतुंतदाब्रह्मा
समागत्याब्रवीत्समां॥३६॥ब्रह्मोवाच॥ ॥देवाकर्णयमेनाकपिता
त्वांदित्सतेसुतां॥तस्मात्त्वयातद्विधेयंममवाक्यनमानद॥३७॥इति-
श्रुत्वाविधेर्वाक्यमगमंस्वगणैःसह॥हिमाचलगृहंदिव्यंसर्वोपस्क
रसंयुतं॥३८॥तदाहिमालयःकन्यांप्रादान्मह्यंप्रसन्नधीः॥तांगृही
त्वागतःसर्वैर्गणैःकैलासमालयं॥३९॥एवमेषामुनेश्रेष्ठापुरामामि-

वभामिनी॥त्यक्त्वादेहंकोकिलायास्तदेतत्कथितंतव॥४०॥अनया
यत्कृतंसत्याव्रतंतुह्यरितालिका॥आल्याापहारितायस्मात्तस्मा
त्साहरितालिका॥४१॥तदेतत्तेमुनेसर्वंकथितंव्रतमादितः॥किम
न्यच्छ्रोतुमिच्छातेवदसर्वंवदाम्यहं॥४२॥सूतउवाच॥शिवोक्तमि
तिसंश्रुत्यनारदस्तेसुरास्तथा॥संप्रीतास्वालयंजग्मुर्नमस्कृत्यमहे
श्वरं॥४३॥स्त्रीणांयथावैहरितालिकाव्रतंतथैवनित्यंकथितंपिको
व्रतं॥अतःपुरेदंजनकस्यकन्ययाकृतंतथान्याभिरपिस्वनुष्ठितं॥
॥४४॥इतिश्रीब्रह्मांडपुराणेउपासनाकल्पेको०म०सप्तदशोध्या
यः॥१७॥ऋषयऊचुः॥ ॥कथंकृतंतद्व्रतंहिसीतयाहिदंरस्वनः॥क न
दावाकिंनिमित्तंवाकेनतस्याःप्रकाशितं॥१॥सूतउवाच॥पितृ
वाक्येनगहनंजगामकिलराघवः॥लक्ष्मणेनसहभ्रात्रासीत
याभार्ययासह॥२॥वनेनिवसतांतेषांत्रयाणामपिसत्तमाः॥

— — — नामभगिनी रावणस्य दुरात्मनः॥ ३॥ राममागत्य सोवाच
को॰म॰ कामालनिंगसुंदरं॥ रामोरिकुरुमां भार्यां स्त्रियत्वा समुपागता॥४॥
३३ इतितस्या वचःश्रुत्वा रामःप्रोवाच ताहसन्॥ सीतामुखं समालोक्य
सदारास्मो वयंसति॥५॥ भ्राता ममास्ति सौमित्रीरदारोपि वनंगतः
तत्वं वरय सौख्यंचे ह्यच्छसा त्वमह निशं॥६॥ इतितस्य वचःश्रुत्वा ब्रवी
द्रक्षः स्वसाच तं॥ अभिज्ञानं किमपि मे देहि सोगी करिष्यति॥७॥ भ्रा
तामेनेतिन छ्रुत्वाब्रवीद्रामःपुनश्चतं॥ पृष्ठंमे दर्शयेनिजंतस्मिश्चिन्हं क
राम्यहं॥८॥ अंगीकरिष्यतित्वां स येन भार्या ममाज्ञया॥ तथेतिदर्शिते
पृष्ठे तयास रघुनंदनः॥९॥ तस्मिंल्लिलेख भगवानिदभो रघुनंदन॥
एतां दृष्ट्वैव कर्णौ छ्रावस्यानां साच रुतं हि॥१०॥ एवं लिखित्वाथो
वाच गच्छतं प्रतिभामिनी॥ इत्युक्ता राक्षसी तेन रामेणातिमनोह
रा॥११॥ भूत्वाथ समुपेयाय सौमित्रीं विनयान्विता॥ उवाचचम

हाभागमामंगीकुरु भामिनी॥१२॥ भार्यार्थमर्पितच्छ्रुत्वा सौमित्री
रपिचाब्रवीत्॥ अहं रामपराधीनो दासोस्य स्यमहात्मनः॥१३॥
तदाज्ञां तो विनानत्वां वरये कमलानने॥ इतितस्य वचःश्रुत्वा शूर्पण
खोवाच तंतदा॥१४॥ तव भ्रात्रा विलिखितं मम पृष्ठे विलोकय॥ इ
तिसा दर्शयामास निजं पृष्ठं मुदान्विता॥१५॥ तद्विलोक्य दधारैनां
कचबंधेसिना श्रुती॥ नासांच चिच्छिदे तस्याःप्र सभं रामसोदरः॥१६
हाहा कृत्वा तत्र सातु राक्षसी खरदूषणौ॥ भ्रातरौ समुपेयाय वेकृ
त्यं स्वं व्यदर्शयत्॥१७॥ तदा तौ राक्षसैः सार्धं चतुर्दश सहस्रकैः॥ आ
गत्य रामेण सह महद्युद्धं प्रचक्रतुः॥१८॥ तदा तौ भ्रातरौ रामलक्ष्म
णौ स्वगुणं धनुः॥ कृत्वा बाणैरनेकैस्तांव्यनाशिष्टां मनाक्किनं॥१९॥
खरदूषणयोश्चैव शिरसी रघुनंदनः॥ चिच्छेद तद्विलोक्या सौ विलला
पाथ तातातिका॥२०॥ रावणंच समागत्य क्रंदती तं जगाद ह॥ त्रैलोक्य
जयिता सा ते क्व गता द्य दशानन॥२१॥ त्वयि जीवत्यपि तच भगि

न्याईदृशीदशा॥ कृता रामेण मेराजन्मनुष्येणदुरात्मना॥२२॥तद्भार्या
ललनारत्नं दृष्ट्वानसविधंगता॥तामानेतुंत्वदर्थंसीतवयोग्यादृगान
३८ न॥२३॥तेनेदृशीममावस्थाकृतामत्सोदरौहतौ॥खरश्चदूषणश्चै
वराक्षसानांबलैःसह॥२४॥त्रैलोक्येरत्नजोसंयत्नस्यभोक्तात्वमे
वहि॥नान्योस्तिलुब्ध्स्यभार्यास्त्वयानयादुरासनः॥२५॥इतिश्रुत्वाथ
भगिनीवाक्यंदशमुखस्तदा॥मारीचमाहूयवचोजगादमुनिसत्तमः
॥२६॥मारीचमृगरूपेणत्वयाश्रमचारिष्णुना॥रामस्यतोनतोन्य
त्रनेयौराघवलक्ष्मणौ॥२७॥अथाहमस्यललनांरूपीरत्नंचानया
म्यतः॥त्वदधीनमिदंकार्यंमारीचास्तिममाखिलं॥२८॥इतिश्रुत्वा
रावणस्यायच्चनंसजगादह॥मारीचउक्तंनतंबुध्दिरुपदिष्टानिना
शदा॥२९॥रामोनमनुजःसाक्षाद्विष्णुरेषसनातनः॥तस्यापि
कृतकिंवास्तितस्मात्त्यजदुराग्रहं॥३०॥इतिमारीचसंप्रोक्तंव

चोदशमुखस्तदा॥निशम्यकुपितःप्राहमदाज्ञालंघकस्त्वतो॥३१
॥शिरोहरिष्येहंमंदकःसुखीराजवंचकः॥इतिवाक्यंसमाकर्ण्य
मारीचोतिभयान्वितः॥३२॥मनस्येवंविचारंसकृतवान्बुध्दिमत्त
मः॥रामाद्धतइयांस्वर्गंनरकंरावणाद्धतः॥३३॥तस्माद्रामगमि
ष्यामिनिश्चित्येत्थंनगादत॥मृगरूपेणगत्वातौनेष्याम्यन्यत्रराव
यं णा॥३४॥इत्युक्त्वैववपुर्धृत्वाविचित्रंराक्षसस्तदा॥रामाश्रमंस
मभ्येत्यबभ्रामेतस्ततःसच॥३५॥तंदृष्ट्वारत्नखचितवपुषंजन
कात्मजा॥उवाचरामहत्वेनंकंचुकीमस्यदेहिमे॥३६॥तथेति
रामःसौमित्रीमुक्त्वारक्षस्वजानकीं॥सशरंधनुरादायमृगंतमुप
जग्मिवान्॥३७॥समृगोदूरमागत्यबाणेनाताडितोमृतः॥हासौ
३८ मित्रेशीघ्रमेहिरुक्त्वाभूमौपपातह॥३८॥तच्छ्रुत्वातस्यवचनं
जानकीभयविह्वला॥उवाचलक्ष्मणंरामंगच्छहिभ्रातृवत्सल॥३९

सीतावाक्यंसमाकर्ण्यलक्ष्मणस्तामुवाचह॥नवचोरामभद्रस॥
३५ भयंत्यजमनस्विनी॥४०॥तदोवाचसती॥सितालक्ष्मणंविनयान्वि
तं॥रामनाशेनमामाप्तुंत्वंमांरक्षसिमूढधीः॥४१॥इतिसीताव
चोश्रृण्वन्कर्णौपिछाद्यकिंनधीः॥धनुषाविदधेरेखामाश्रमस्याभि
तोययौ॥४२॥गतेथलक्ष्मणेरक्षोरावणोना मदारुणः॥आश्र
मोस्समुपेयायत्रिदंडीवेषधारकः॥४३॥भिक्षार्थमागतेदृष्ट्वाय
तिनंजनकात्मजा॥दातुंभिक्षांसमापन्नारेखायाबहिरेवसा॥४४॥
तदासरीतांजनकात्मजांता॥ततोनिर्जित्यजटायुषंमृधे॥
अशोकवृक्षाधवनेनिधायदुःखेरनकैसमपीडयत्सती॥
॥४५॥इतिश्री ब्र० पु० क० कोम० अष्टादशोध्यायः॥१८
॥सूतउवाच॥ ॥राघवोलक्ष्मणंदृष्ट्वाजगादातिरुषान्वितः॥

१८
किमिदंकृतवान्भ्रंत्यक्त्वासीतामुपागतः॥१॥ततोब्रवीत्लक्ष्मण
स्तद्युक्तंसितयारुषा॥तच्छ्रुत्वोवाचरामस्तंत्वयासम्यक्कृतंनं
हि॥२॥केनापिसीतानीतास्यात्शीघ्रमितिभातिमे॥ततोवि
त्याजगामाश्रमंरामःसलक्ष्मणः॥३॥सीतामदृष्ट्वासंतप्तोविचि
कायसमंततः॥पप्रच्छान्मृगवृक्षसर्वाअरण्यस्याधिदेवताः॥४॥
सूर्यवंशाधिपंचैवसीतायामातरंमहीं॥पृच्छन्बभ्रामविपिनेनले
पुनः भेजानकींसुतां॥५॥एवंगच्छद्ददर्शाथसंपरेतजटायुषं॥ततोकच
समाकर्ण्यदृष्ट्वातंस्वकृतमृतं॥६॥शोकाभिभूयरामोथदग्ध्वा
तंपितृवत्क्रियाः॥कृत्वादुःखीवनवासकृतवान्सहलक्ष्मणः॥७
ततोदुःखमनीशःसन्सोदुंपप्रच्छलक्ष्मणं॥कस्मादिदंसमुद्भूतंपा
तकाद्दुःखकारणं॥८॥अथतंलक्ष्मणोनानायुक्तिभिःपरिसांत्व
यं॥सहतेनवनेघोरेवभ्रामाकुलचेतसा॥९॥अरण्येविचरंतौ

श्री म. तौसुग्रीवौवीक्ष्यमारुतिं॥प्रेषयामासविधुरोवालिनाहृतयास्त्रि
३८ या॥१०॥हनुमानेत्यरामंसपृष्टवान्कृतमादितः॥रामोपिकथयामास
राज्यत्यागादिसर्वशः॥११॥तच्छ्रुत्वोवाचहनुमानवंचेन्मत्सखाकपिः
॥सुग्रीवोस्तिसदुःखस्तेसर्वंकार्यंकरिष्यति॥१२॥अतस्त्वनत्व
याकार्यस्तिशीलेनंचमित्रता॥इत्युक्त्वोरामचंद्रश्च सुग्रीवेणस
हाकरोत्॥१३॥सख्यंततःससुग्रीवोजगादनिजदुःखिनां॥तच्छ्रु
त्वाप्रतिजज्ञेतंवालिनोहननंप्रभुः॥१४॥ततःकपीश्वरोप्येनंताल
वेधादिनामुने॥परीक्ष्यबालीहननंजातमित्येवनिश्चितः॥१५॥ नः
ततोरामोपिसुग्रीवंप्राहवालीरणंप्रति॥आहूयतांत्वयागत्वा
प्रच्छन्नोघातयेपरं॥१६॥ततोगत्वाथसुग्रीवआजुहावमहा
कपिं॥वालिनंसमरार्थंसकुपितोनिर्ययौमहान्॥१७॥ततस्तौ
३६

वालिसुग्रीवौयुध्यमानौविलोक्यसः॥रामोबाणंमुमोचासौह
द्विभेदास्यवालिनां॥१८॥ततोराज्यंस्त्रियंचैवसुग्रीवःप्राप्यमार्ग
णे॥सीतायाःप्रेषयामासकपीन्स्वचन्महामतिः॥१९॥अथसाजा
नकीसादुमशोकारक्षसांगृहे॥दुःखंरामवियोगंचमरणार्थंसमु
द्यता॥२०॥ज्ञात्वातांमतिदुःखार्तांनारदोभगवान्मुनिः॥गुरुःसमेत्य
चोवाचरुदमाकंपिकांमतां॥२१॥तदाकर्तुमशक्तासानारदोनु
मतेनैनतत्॥संकल्पयामासचित्तेरामदर्शनकाम्यया॥२२॥एत
स्मिन्नंतरेशाखामृगाःसुग्रीवनोदिताः॥मार्गमाणाजनकजां
मुद्दिशदमायपुः॥२३॥तत्रसंपातिनामानंदृष्ट्वाबंधुजटायुषः
॥अपृच्छंस्तजनकजावृत्तंसाकथयच्चताः॥२४॥रावणेन
३१ हृतांसीतामशोकापवनस्थितां॥वसतींस्तुमुखाच्छ्रुत्वाकपयः
३२ भयसंयुताः॥२५॥समुद्रतरणेसर्वेप्रार्थयन्वायुनंदनं॥सोगी

को॰ ३७ महत्कार्यंपुप्लुवेनदाकपिः॥२६॥गत्वालंकांविलोक्यासावशोकवनि
काश्रितां॥सीतांतत्प्रत्ययार्थंसमुद्रांतस्येददौकपिः॥२७॥साथपप्र
छवृत्तंसकथयामाससर्वशः॥अथसीताज्ञयाचक्रेवनभंगंकपीश्व
रः॥२८॥अनंतरंरावणेनधृतोदग्ध्वापुरींततः॥आजगामस्थितायत्र
कपयःखिन्नचेतसः॥२९॥तैःसाकमेत्यहनुमान्रामायोवाचयत्कृ
तं॥श्रुत्वेनतद्समाकर्ण्यरामःसुग्रीवसंयुतः॥३०॥सलक्ष्मणःसक
पिभिःसमुद्रतटमाययौ॥समुद्रप्रार्थितःसोथबध्वासेतुंमहादधौ
॥३१॥बिभीषणेनसहितोलंकांप्रतिजगामह॥युद्धंकृत्वारावणे
तंजघानसुरैःसह॥३२॥राक्षसांश्चमहाघोरानवधीद्राघवोरिपून्
॥ततोजगामकपिभिर्यत्रास्तेजानकीशुभा॥३३॥जानकीतंसमा
लोक्यमुमुदेजातसंभ्रमः॥अस्मरच्चव्रतंपिकयानारदोक्तंसुखप्र
दं॥३४॥अथरामोयातुराज्येस्थापयित्वाबिभीषणं॥कीशैःसुग्री

वप्रमुखैराजगामनिजंपुरं॥३५॥स्वभक्तेनप्रार्थितःसन्भरतेन
महायशाः॥राज्यंचकारधर्मेणररक्षपितृवत्प्रजाः॥३६॥अथसाप्रा
र्थयामासजानकीनाथमादृतं॥संकल्पितंव्रतंतत्तुकर्तुंजातस्पृहास्मि
ते॥३७॥तच्छ्रुत्वारामभद्रोपितयासहचचारह॥कोकिलाव्रतंरा
जापूर्वोक्तविधिनाखिलं॥३८॥नारदंचसमाहूयपुपूजव्रतदेशिकं
॥व्रतप्रभावतोजज्ञेतस्याःपुत्रद्वयंशुभं॥३९॥कुशोलवइतिख्यातौ
पुत्रौदत्त्वासराघवः॥राज्येनिधायतौयातोवैकुंठंनिजमंदिरं॥४०॥
देवैःसंप्रार्थितोविष्णुर्भूत्वादशरथात्मजः॥सेतुंबध्वागमल्लंकांहत्वा
राक्षसमाहवे॥४१॥सीतयासहितोयोध्यांगत्वाराज्यंविधायच॥नि
धायभूमौस्वयशोधामप्रापनिजंपुनः॥४२॥इतीदमुक्तंमुनिसत्तमाम
यासीताचरत्तद्व्रतमादराद्यथा॥यथानलस्यापिसतीचचाहरव्रतं
यथावःकथयामिसर्वशः॥४३॥इतिश्रीब्र॰पु॰क॰को॰म॰एकोन॰यः॥

॥सूतउवाच॥ ॥निषधेष्वभवद्राजा नलो नाम महायशाः॥दमयं
तीतिनाम्नासीत्तस्य भार्या महासती॥१॥तस्य राज्यं पालयतो नैष
स्य पृथिवीपतेः॥सदृशो भाविनो बुद्धिरभवन्मुनिसत्तमाः॥२॥द्युता
सक्तोभवद्राजा ह्यनिशं तत्परायणः॥तदा स मंत्रिभिः सर्वैर्बोधितोपि
जहौ न तत्॥३॥व्यसनं कलिना विष्टो भवितव्यविमोहितः॥अथ
तस्याक्षधूर्तोभूत्सगोत्रः पृथिवीपतिः॥४॥द्युतार्थमागतो राज्ञा
नलेन पृथिवीक्षिता॥सोदिव्यताक्षैस्तेनापि नलः संस्थाप्य वै पणं
॥५॥सोक्षादवीजयत्तं तु भार्याश्वरथपत्तिकं॥सदिव्य निष्किकाप
श्चात्यादकापत्यां नलस्तथा॥६॥सर्वस्वं हारयित्वाथ नलस्तूष्णीं
स्थितो नृपः॥तदा स कितवः प्राह दिव्य कृत्वा पणं पुनः॥७॥आहूतो
न निवर्तेत द्युतादपि रणादपि॥एतं धर्मं क्षत्रियाणां स्मृत्वा कुरु स्म पा
र्थिव॥८॥ततः प्राह नलो राजा पणं किं करवाण्यहं॥धूर्तः प्रोवाच

महिषीं पणं कुरु दीदीविषा॥९॥यदि नैवं च तं श्रुत्वा नलः प्रोवाच धा
र्मिकः॥ सहैव लोपितं देह द्वयं नौ यद्यहं जितः॥१०॥ नहि स्त्रिया सह
वनं गमिष्यामि न संशयः॥तदाक्षदेवी जयाग्रहे वनासा करयतान्॥११
॥मुमोच जितमित्युक्त्वे नन स्तदा मदान्वितः॥तदा नलोप्यखिन्नात्मा
कलिना धर्षितोपि च॥१२॥ स्त्रिया सह विनिष्क्रांतो नगराधैर्य संयुतः
॥तं गच्छंतं च नंद स्वा सपत्न्यः प्राह वै हसन्॥१३॥अलंकारादिकं सर्वं
मदीयं नय सिंकतु॥त्वया पराजितं द्युते त्यक्त्वा व्रजवन नला॥१४॥तथे
त्युक्त्वा परित्यज्य वस्त्रद्वय समन्वितः॥दमयंत्यपि तत्याज वस्त्रभूषा
दिकं च यत्॥१५॥सौमांगल्यं स्थापयित्वा ततस्तौ निर्गतौ पुरात्॥ह
ष्ट्वा पौरा मंत्रिणश्च चुक्रुशुर्दुःखसंयुताः॥१६॥प्रार्थयामासु राजा
नं नयास्मानपि पार्थिव॥त्वां विना धर्मशीलेन कुनृपेन कथं वयं॥१७॥
जीवाम इति तच्छ्रुत्वा राजोवाच जनान्स्मयन्॥कालो हेतुः सुखे दुः